अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातककार्यक्रमाः – विविधदर्शनानि

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली - 110002

आचार्यपरम्परायै समर्पितम्

अथाधिविद्यम्।

आचार्यः पूर्वरूपम्। अन्तेवास्युत्तररूपम्। विद्या सन्धिः। प्रवचनं सन्धानम्।

इत्यधिविद्यम्।

तैत्तिरीयोपनिषद्, शिक्षावल्ली, तृतीयानुवाकः

कृतज्ञताविष्करणम्

संस्कृतभाषायाः तच्छास्त्राणाञ्च अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखायाः (LOCF) निर्माणे संलग्नानां विभिन्नानां समितीनां च कृते हार्दिकीं कृतज्ञतां प्रकटयामः।

पारम्परिकसंस्कृतज्ञानपरम्पराणां समकालीनशैक्षणिकमानकैः सह समन्वयने बहुमूल्यविचारं विद्वद्योगदानञ्च दत्तवत्यै तथा निरन्तरप्रयासं कृतवत्यै विश्वविद्यालय-अनुदान-आयोगस्य (UGC) संस्कृतभाषायाः अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखासमित्यै, पाठ्यचर्याविकाससमित्यै, समन्वयसमित्यै च विशेषतया कृतज्ञाः स्मः।

विश्वविद्यालय-अनुदान-आयोगेन (UGC) तथा UGC LOCF सञ्चालनसमित्याः अध्यक्षाभिः प्रो. सुषमायादवमहोदयाभिः समये समये पाठ्यचर्यायाः गुणवत्तावर्धनाय एवं तस्याः प्रासंगिकतां च सुनिश्चेतुम् अपेक्षितं मार्गदर्शनं साहाय्यं च विहितं वर्तते। तदर्थं हार्दिकीं कृतज्ञताम् आविष्कुर्मः।

एतस्याः रूपरेखायाः निर्माणे संशोधने च स्ववैदुष्यम् उपयुज्य निर्दुष्टायाः पाठ्यचर्यायाः सम्पादने परामर्शदातॄभ्यः पाठ्यचर्यानिर्मातॄभ्यः च समेभ्यः विद्वद्भ्यः, शिक्षाविद्भ्यः, समीक्षकेभ्यः च हार्दिकीं कार्तज्ञ्यपरम्परां विनिवेदयामः।

केन्द्रीयसंस्कृतविश्वविद्यालयस्य सहयोगेन अस्याः ***अ.प.पा.रूपरेखायाः*** निर्माणमभवत्।

Acknowledgement

We express our sincere gratitude to the various committees involved in the preparation of the Learning Outcomes-based Curriculum Framework (LOCF) in Sanskrit and its Shastras.

We are especially thankful to the UGC LOCF Committee (Sanskrit), Curriculum Development Committee, and the Coordination Committee for their valuable insights, scholarly contributions, and tireless efforts in aligning traditional Sanskrit knowledge systems with contemporary academic standards.

We also acknowledge the guidance and support provided by the University Grants Commission (UGC) and Chairperson, UGC Steering committee, LOCF, in facilitating collaborative academic discourse and ensuring the quality and relevance of the curriculum. Our heartfelt thanks go to all scholars, educators, and reviewers who participated in the consultative processes, contributing their expertise to enrich this framework.

This ***LOCF*** is prepared with the assistance of ***Central Sanskrit University.***

UGC LOCF Committee (Sanskrit)

Prof. Shrinivasa Varkhedi
Chairperson of the committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058 ✉vc@sanskrit.nic.in

Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval,
✉ sukantsnpt@gmail.com

Prof. Viroopaksha V. Jaddipal
Secretary, Maharishi Sandipani Rashtriya Ved Vidya Pratishthan, Ujjain, ✉ vvjaddipal@gmail.com

Dr. M. V. Natesan
(Retd Prof.) SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10, ✉ natesanskt2000@gmail.com

Dr. Mamta Tripathi
Assistant Professor, Gargi College, University of Delhi, Delhi, ✉ mamtatripathi.jnu@gmail.com

Co-ordination Committee

Dr. G. Surya Prasad
Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058 ✉ dr.gsurya.prasad@csu.co.in

Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉dr.awasthisailesh@csu.co.in

Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058,
✉dr.kishor_kumar@csu.co.in

प्रो. श्रीनिवासः वरखेडी
कुलपतिः
Prof. Shrinivasa Varakhedi
Vice-Chancellor

केन्द्रीयसंस्कृतविश्वविद्यालयः
संसदः अधिनियमेन स्थापितः
Central Sanskrit University
Established by an Act of Parliament

CSU/VC-102/2025-26/92

Date – 18.06.2025
आ.कृष्णसप्तमी, वि.सं. 2082

Foreword

Sanskrit For Future

It is a matter of immense pride and privilege to present the Learning Outcomes-Based Curriculum Framework (LOCF) for Sanskrit and its Shastras, developed under the aegis of the University Grants Commission (UGC). This initiative marks a landmark in the history of Sanskrit education, providing a structured, learner-centric, and globally aspirational curriculum that aligns harmoniously with the transformative vision of the National Education Policy (NEP) 2020.

Sanskrit is not merely a language; it is a rich source of knowledge and a discipline of many disciplines. It is a gateway to India's vast, time-tested knowledge systems (IKS), embracing philosophy, science, linguistics, mathematics, and artistic expression. This LOCF encapsulates the grandeur of Sanskrit's intellectual traditions while addressing the dynamic demands of contemporary higher education.

The primary objective of this curriculum is to make Sanskrit an aspirational discipline for the youth of today, instilling a deep understanding of its rich intellectual traditions while applying its knowledge to solve contemporary problems. It seeks to empower young learners not only to appreciate their linguistic and cultural heritage but also to utilise Sanskrit's unique perspectives to innovate and contribute to fields such as education, technology, health care, environmental sustainability, legal studies and governance.

This framework has been meticulously designed by a large team of scholars who collectively contributed to nearly 800 courses across 5 streams Majors, Minors, Multi-Disciplinary, Skill Enhancement, and Value-Added to provide flexible academic pathways. It aims to produce graduates who are proficient in classical knowledge, equipped with modern skills and able to act as a bridge between India's rich past and its future aspirations.

Additionally, this framework encourages the importance of Sanskrit as a medium of instruction to achieve Sanskrit teaching in Sanskrit. It promotes for the use of Simple Standard Sanskrit in classrooms, thereby strengthening the linguistic skills and deepening understanding of the discipline. It bridges the timeless wisdom enshrined in Sanskrit texts with the technological innovations of the modern era, fostering employability, critical thinking, interdisciplinary engagement, and research aptitude among learners.

I am grateful to the distinguished members of the UGC-constituted LOCF Committee, the sub-committees across all Sanskrit disciplines, the Co-ordination Committee, and all dedicated scholars and educators who contributed their expertise in crafting this comprehensive framework.

Let this framework inspire a new generation of learners and thinkers, rooted in tradition, equipped for innovation, and prepared to lead responsibly in the ever-evolving world.

(Prof. Shrinivasa Varakhedi
Chairperson, UGC LOCF Committee (Sanskrit)
Vice-Chancellor, Central Sanskrit University, New Delhi

56-57, संस्थानिक क्षेत्र, जनकपुरी, नई दिल्ली-110058 (भारत)
56-57, Institutional Area, Janakpuri, New Delhi-110058 (INDIA)
(O) 011-28523949 www.sanskrit.nic.in
vc@sanskrit.ac.in / vicechancellor@csu.co.in

अस्याः कार्यक्रमरूपरेखायाः प्राथमिकविवरणानि

एषा विविधदर्शनानां अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा द्विधा प्रस्तूयते -

1. ***परिचयः।***
2. ***प्रथमभागः (विविधदर्शनानां स्नातककार्यक्रमाः)***

परिचये अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखायाः (अ.प.पा.रू.) राष्ट्रियशिक्षानीत्या (२०२०) सह संयोजनम्, अ.प.पा.रूपरेखामाध्यमेन संस्कृतशिक्षायाः समुन्नयनम् इत्यादयः परिचयात्मकविषयाः विमृष्टाः।

प्रथमभागे विविधदर्शनस्नातककार्यक्रमाणां पाठ्यक्रमाः प्रस्तुताः सन्ति। एतेषु सर्वेषु कार्यक्रमेषु प्रधानाः पाठ्यक्रमाः (Major Courses), गौणाः पाठ्यक्रमाः (Minor courses) अधोलिखितरूपेण प्रदर्श्यन्ते -

- **प्रधानः पाठ्यक्रमः (Major) 1.1**
- **गौणः पाठ्यक्रमः (Minor) 1.क.1**

प्रधानेषु पाठ्यक्रमेषु कश्चन कूटाङ्कः, यथा - 1.1, 2.1 इति रूपेण दत्तः। एतस्मिन् कूटाङ्के प्रथमसङ्ख्या कार्यक्रमस्य वर्षं सूचयति, द्वितीयसङ्ख्या पाठ्यक्रमसङ्ख्याञ्च सूचयति।

पुनश्च गौणानां पाठ्यक्रमाणां कूटाङ्के अक्षरस्यापि योजनं, यथा - 1.क.1 इति रूपेण कृतम्। एतादृशः सङ्ख्या-अक्षरसंवलितकूटाङ्कः (Alpha Numeric) गौणं पाठ्यक्रमं सूचयति। अत्रापि प्रथमसङ्ख्या कार्यक्रमस्य वर्षं, द्वितीयसङ्ख्या पाठ्यक्रमसङ्ख्याञ्च सूचयति।

पुनश्च कार्यक्रमेषु अनिवार्य-अभिविन्यासपाठ्यक्रमाः (Compulsory Orientation Courses), बहुशास्त्रीयपाठ्यक्रमाः (Multi-Disciplinary Courses), कौशलवर्धनपाठ्यक्रमाः (Skill Enhancing Courses), मूल्यवर्धनपाठ्यक्रमाः (Value Added Courses) च भवन्ति। एते अनिवार्याभिविन्यास-बहुशास्त्रीयपाठ्यक्रमादयः सर्वेषामपि संस्कृतसम्बद्धानां कार्यक्रमाणां कृते समानाः भवन्तीत्यतः संस्कृतस्य संस्कृतशास्त्राणाञ्च अधिगमपरिणामाधारित-पाठ्यचर्यारूपरेखायां प्रदत्ताः पाठ्यक्रमाः स्वीकर्तुं शक्यन्ते।

एते पाठ्यक्रमाः **द्वितीये भागे** द्रष्टुं शक्यन्ते। तत्प्राप्तये अत्र नुदन्तु।

KEY INFORMATION REGARDING THE PROGRAM FRAMEWORK

This LOCF of B.A. Hons. (Sanskrit) and Sanskrit Shastras is being presented as follows: -

1. ***Introduction***
2. ***Part – I (B.A. Hons.Advaita, B.A. Hons Dvaita etc. Darshanas)***

The Introduction Part consists Aligning LOCF with NEP 2020, Innovating Sanskrit Education through LOCF etc.

Part - I consist B.A. Hons. (Sanskrit) and various Programs of Sanskrit Shastras which includes Major Courses and Minor Courses. These components are organized under the following nomenclature:

- **Major 1.1**
- **Minor 1.A.1**

The Major Courses follow a specific serial format such as Major 1.1, Major 2.1, etc., where the first digit denotes the year of the program and the second digit indicates the course number within that year.

For Minor Courses, an alphanumeric pattern such as Minor 1.A.1, Minor 2.A.1, etc., is used. Here, the first digit represents the year, the second digit corresponds to the course number, and the inclusion of the letter "A" distinctly marks it as a Minor Course.

Also these programmes consist Compulsory Orientation Courses, Multi-Disciplinary Courses - both from General Disciplines (MD-G) and Sanskrit Discipline (MD-S) - as well as Skill Enhancement Courses (SEC) and Value-Added Courses (VAC). Since these compulsory interdisciplinary courses are common for all Sanskrit-related programs, the courses prescribed in the **Learning Outcome–based Curriculum Framework for Sanskrit and Sanskrit Shastras** may be adopted.

These courses are available in **Part-II**. To see **Click Here.**

विषयसूची

परिचयः 10

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखायाः (अ.प.पा.रू.) राष्ट्रियशिक्षानीत्या (२०२०) सह संयोजनम् ... 11

अ.प.पा.रूपरेखामाध्यमेन संस्कृतशिक्षायाः समुन्नयनम् 14

संस्कृतभाषा अध्ययनशाखानाम् अध्ययनशाखा 17

संस्कृतशिक्षायाः अधिगमस्य उद्देश्यानि 21

संस्कृतशिक्षायाः अधिगमपरिणामाः 21

समकालीनशिक्षायां संस्कृतं तस्य प्रासंगिकता च..... 23

संस्कृतं भारतीयज्ञानपरम्परायाः (IKS) एकीकरणस्य आधारः 23

प्राचीनज्ञान-आधुनिकनवाचारयोः सेतुत्वेन संस्कृतशिक्षायाः परिवर्तनम्..... 24

संस्कृतस्नातकस्य गुणाः 32

संस्कृतस्नातकानां योग्यतासंसूचकानि 34

श्रेयोऽङ्कवितरणम् 35

राष्ट्रियशिक्षानीतेः अनुसारं स्नातककार्यक्रमस्य प्रस्तावित श्रेयोऽङ्कसंरचना 37

प्रस्तावितमूल्याकलनरूपरेखा (Proposed Assessment Framework)..... 38

प्रस्तावितश्रेयोऽङ्कविभाजनम् (Proposed Credit Distribution)..... 39

प्रथमभागः (Part - I) 40

B.A. Hons.(Advaita-Vedanta) .....

B.A. Hons. (Dvaita-Vedanta) .....

B.A. Hons. (AksharaPurushottam Darshanam) .....

B.A. Hons. (Mimansa-Darshanam) .....

B.A. Hons. (SankhyaYoga Darshanam) .....

B.A. Hons. (Jaina-Darshanam) .....

परिचयः

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखायाः (अ.प.पा.रू.) राष्ट्रियशिक्षानीत्या (२०२०) सह संयोजनम्
(Aligning LOCF with NEP 2020)

विश्वविद्यालय-अनुदान-आयोगेन (UGC) प्रकाशिता अधिगमपरिणाम-आधारिता पाठ्यचर्यारूपरेखा (अ.प.पा.रू.) भारतस्य शैक्षिकसंशोधनस्य एकः महनीयपदनिक्षेपः विद्यते। रूपरेखेयं राष्ट्रियशिक्षानीतिः (रा.शि.नी.) (२०२०) इत्यस्याः परिवर्तनकारिसिद्धान्तैः सह निकटतया सङ्गतिं प्राप्नोति, यत्र मापनयोग्याः दक्षता-आधारित-अधिगमपरिणामाः केन्द्रबिन्दवः भवन्ति। एषा अ.प.पा.रूपरेखा रा.शि.नीतौ (२०२०) उक्तवत् प्रशिक्षुकेन्द्रित-कौशलवर्धक-शैक्षिकवातावरणे आधारिता वर्तते। तथा च अ.प.पा.रूपरेखा (LOCF) रा.शि.नीत्याः (२०२०) समग्रोद्देश्यैः सह पाठ्यचर्यायाः संयोजनं करोति। अस्य संयोजनस्य (Aligning) केचन प्रमुखाः पक्षाः अधः उल्लिखिताः सन्ति -

1. प्रमुखतत्त्वरूपेण परिणामाधारितशिक्षा

अ.प.पा.रूपरेखा (LOCF), मौलिकरूपेण परिणामाधारितशिक्षाम् (Outcome Based Education) आधारीकृत्य संरचितः शिक्षणशास्त्रीयोपागमः। अस्मिन् शिक्षणशास्त्रीयोपागमे शिक्षणपद्धतयः, शिक्षणक्रियाकलापाः, मूल्याङ्कनं च स्पष्टतया परिभाषितैः शिक्षणपरिणामैः सह संरेखिताः सन्ति। एतेन छात्राः व्यावहारिकजगदुपहुतीः प्रति प्रासंगिककौशलस्य दक्षतानाम् अनुप्रयुक्तज्ञानस्य च विकासस्य सुनिश्चयं कर्तुमर्हन्ति।

रा.शि.नीतिः (२०२०) अपि एतादृशीं दृष्टिं मनसि निधाय समीक्षात्मकचिन्तनस्य, नैतिकनिर्णयस्य, अनुकूलतायाः च कृते बलं ददाति। पारम्परिक-कण्ठस्थीकरणशिक्षणात् अनुप्रयोग-आधारितशिक्षां प्रति एधन्त्यौ अ.प.पा.रूपरेखा तथा रा.शि.नीतिः (२०२०) इत्येते द्वे अपि शिक्षां प्रासंगिकीं, सामर्थ्ययुक्तां च कर्तुम् इच्छतः। एतेन स्नातकाः एकविंशशताब्द्याः आवश्यककौशलानि सम्पाद्य जीविकोपार्जनक्षमाः भवन्ति।

2. समग्रशिक्षा बहुशास्त्रीयशिक्षा च

अ.प.पा.रूपरेखा तथा रा.शि.नीतिः (२०२०) इत्येते द्वे अपि समग्रविकासे बहुशास्त्रीयशिक्षणे च बलं दत्तः। अ.प.पा.रूपरेखायाः पाठ्यचर्या न केवलं संस्कृते तथा संस्कृतशास्त्रेषु च विशिष्ट-विशेषज्ञतां प्रदातुम् उद्दिष्टा अपितु छात्रान् वास्तविकजगतः समस्यानां, जटिलतानां कृते सज्जीकर्तुम् उपयुक्तां शिक्षां दातुं सूचयति। इयं रूपरेखा स्वपाठ्यचर्यायां प्रधान-गौण-बहुशास्त्रीय-कौशलवर्धन-मूल्यवर्धनपाठ्यक्रमान् एकीकरोति, येन छात्राः विविधक्षेत्राणाम् अन्वेषणं कर्तुं समर्थाः भवन्ति।

रा.शि.नीतिः (२०२०) अध्ययनशाखासीमाः विच्छिद्य अन्येषु कला-विज्ञान-मानवविज्ञान-व्यावसायिकपाठ्यक्रमेषु ज्ञानम् अन्वेष्टुं प्रोत्साहयति। एषा दृष्टिः बौद्धिकनमनीयताम्, अनुभवात्मकं शिक्षणं, कौशलाधारितशिक्षां च पोषयति यच्च अ.प.पा.रूपरेखायाः उद्देश्यैः सह युज्यते। तथैव रा.शि.नीतिः (२०२०) अ.प.पा.रूपरेखा च सर्जनशीलता, समीक्षात्मकचिन्तनं, समस्यानिराकरणम् इत्यादीनां दक्षतानां विकासं च प्रोत्साहयतः। एताः दक्षताः छात्राणां कृते स्ववृत्तिषु विकासं प्राप्तुम् अत्यावश्यकाः भवन्ति।

3. कौशलविकास-व्यावसायिकशिक्षयोः एकीकरणम्

जीविकोपार्जनक्षमतायाः महत्त्वं स्वीकृत्य अ.प.पा.रूपरेखा तथा रा.शि.नीतिः (२०२०) इत्येते द्वे अपि कौशलविकासस्य व्यावसायिकप्रशिक्षणस्य च विषये अधिकम् अवधानम् अदत्ताम्। अ.प.पा.रूपरेखा इत्यत्र कौशलवर्धनपाठ्यक्रमाः (SECs) सन्ति, ये विविधक्षेत्रेषु व्यावहारिकप्रशिक्षणं प्रदाय छात्रान् प्रासंगिककौशलैः सह सुसज्जितान् कुर्वन्ति।

एवमेव रा.शि.नीतिः (२०२०) सर्वेषु स्तरेषु प्रशिक्षुता-शिक्षुता-वास्तविकजगत्परियोजनादीनां (Internships, Apprenticeships and Real-World Projects) माध्यमेन व्यावसायिकशिक्षायाः एकीकरणं प्रवर्धयति। एतत्संरेखणं सुनिश्चिनोति यत् छात्राः वृत्त्युन्नयनार्थम् आत्मनिर्भरतार्थं च आवश्यकीं तन्त्रनीतिं तन्त्रांशकौशलानि (Soft Skills) च प्राप्नुयुः।

4. भारतीयज्ञानपरम्परा तथा मूल्य-आधारितशिक्षा

अ.प.पा.रूपरेखा पाठ्यचर्यायां मूल्यवर्धनपाठ्यक्रमान् (VACs) समावेशयति। एषा रूपरेखा रा.शि.नीत्या (२०२०) सह संयुज्य भारतीयज्ञानपरम्परायाः (IKS) नैतिकमूल्यानाञ्च शिक्षायाः मुख्यधारायाम् एकीकरणे बलं प्रददाति। एते पाठ्यक्रमाः अत्र प्रोत्साह्यन्ते -

- **सांस्कृतिकनिधिः, पारम्परिकज्ञानञ्च -** भारतस्य बौद्धिकदार्शनिकपरम्पराणां प्रशंसां कर्तुं प्रोत्साहनम्।
- **नैतिकशिक्षा** - सत्यनिष्ठा, सहानुभूतिः सामाजिकदायित्वम् इत्यादीनि मूल्यानि प्रवर्धयति।
- **योगशिक्षा स्वास्थ्यसंवर्धनशिक्षा च** - रा.शि.नीतेः समग्रशिक्षादृष्टिकोणस्य अनुरूपं छात्राणां शारीरिकं मानसिकं च कल्याणं समर्थयति।

पाठ्यचर्यायां भारतीयसांस्कृतिकमूल्यानि नैतिकशिक्षणानि च समावेश्य अ.प.पा.रूपरेखा एतत् सुनिश्चिनोति यत् छात्राः रा.शि.नीतेः (२०२०) उद्देश्यस्यानुरूपं राष्ट्रगौरवस्य नैतिकदायित्वस्य च भावनाम् आत्मसात्कुर्युरिति।

5. नमनीयता - आजीवनम् अधिगमश्च

अ.प.पा.रूपरेखायाः रा.शि.नीत्याः (२०२०) च आधारशिला नमनीयता विद्यते। अ.प.पा.रूपरेखा नमनीयतासहितां श्रेयोऽङ्कप्रणालीं, बहुविधप्रवेशनिर्गमविकल्पान्, अन्तःशास्त्रीय-अधिगमस्य अवसरान् च प्रददाति, येन छात्राः व्यक्तिगतरुचिषु जीविकोपार्जनलक्ष्येषु च आधारितं स्वशिक्षानुरूपं भविष्यनिर्माणं कर्तुं शक्नुवन्ति।

एवमेव रा.शि.नीतिः (२०२०) बहुविधप्रवेश-निर्गमनविकल्पानां माध्यमेन आजीवनशिक्षणाय बलं प्रददाति, येन छात्राः स्वस्य जीविकोपार्जनलक्ष्यस्य विभिन्नेषु चरणेषु पुनः शैक्षणिकक्षेत्रे प्रवेशं प्राप्तुं समर्थाः भवन्ति। एषा रूपरेखा सामाजिक-आर्थिक-अन्तरस्य पूर्त्तिं कुर्वती, शिक्षायाम् अनुकूलताम् आनयन्ती सती सौलभ्याय समावेशितायै च (Accessibility and Inclusivity) अवसरान् कल्पयति।

अ.प.पा.रूपरेखा संस्कृतशिक्षायां विभिन्नेषु चरणेषु संरचितनमनीयतां प्रददाति-

- **स्नातकस्तरीयप्रमाणपत्रकार्यक्रमः (01-वर्षः)**: संस्कृते, संस्कृतशास्त्रेषु च आधारभूतज्ञानस्य प्रदानम्।

- **स्नातकस्तरीयडिप्लोमाकार्यक्रमः (02-वर्षौ):** कौशल-आधारित-शिक्षणेन सह अग्रिम-ज्ञानप्रदानम्।
- **स्नातकपदवी (03-वर्षाः):** सुविस्तृतरूपेण संस्कृतस्य तथा शास्त्राणां च संस्कृतज्ञानप्रदानम्।
- **प्रतिष्ठा/अनुसन्धानेन सह प्रतिष्ठा (04-वर्षाः)**: गहनरूपेण विषयविशेषज्ञता शोधकौशलञ्च।

एषा नमनीयता छात्राणां कृते स्वचितेषु क्षेत्रेषु विकासं प्राप्तुम् अधिकावसरान् ददाति।

6. अनुभवात्मकं शिक्षणं प्रशिक्षुता च

अनुभवात्मकशिक्षणम् अ.प.पा.रूपरेखायाः (LOCF) एकः प्रमुखः सिद्धान्तः विद्यते, यः सैद्धान्तिकज्ञानेन सह प्रशिक्षण-अनुभवान् एकीकरोति। छात्राः तान् प्रशिक्षण-अनुभवान् वास्तविकजगति अनुप्रयुज्य अनुकूलतां, नवीनतां, योग्यतां च (Adaptability, Innovation and Competence) आत्मसात्कुर्वन्ति।

अ.प.पा.रूपरेखा प्रशिक्षुताः परियोजनाश्च प्रोत्साहयति। द्वयमेतत् समीक्षात्मकचिन्तनक्षमतां, समस्यानिराकरणक्षमतां च प्रवर्धयति। प्रशिक्षुताकार्यक्रमैः छात्राः व्यावसायिकवातावरणेन सह प्रत्यक्षं संपर्कं प्राप्नुवन्ति, येन तेषां सामूहिककार्यं, सम्प्रेषणकला, रणनैतिकचिन्तनं चेत्यादीनां प्रमुखकौशलानां विकासे साहाय्यं भवति। परियोजनाभिः छात्राः स्वज्ञानं व्यावहारिकविषयेषु प्रयोक्तुं शक्नुवन्ति।

7. मूल्याकलनं सततमूल्याङ्कनञ्च

अ.प.पा.रूपरेखा पारम्परिकपरीक्षाणां स्थाने रचनात्मकस्य सततमूल्याकलनस्य समर्थनं करोति। मूल्याकलनरूपरेखायां नियमितपरीक्षणानि, प्रदत्तकार्याणि, मध्यसत्रमूल्याङ्कनानि, परियोजना-आधारितशिक्षणं, चिन्तनात्मकमूल्याकलनानि च सन्ति। एतानि सर्वाण्यपि सतताधिगमं, सततप्रतिपुष्टिञ्च प्रवर्धयन्ति।

रा.शि.नीतिः (२०२०) अपि पारम्परिकपरीक्षापेक्षया रचनात्मकस्य सततमूल्याकलनस्य समर्थनं करोति, येन दक्षताधारितानि अनुप्रयोगोन्मुखानि च मूल्याकलनानि पुष्टीक्रियन्ते। एतत् संरेखणं छात्राणां सम्प्रत्ययात्मकावबोधं, समीक्षात्मकचिन्तनं, व्यावहारिकप्रयोगं च केन्द्रीकृत्य समावेशयुक्त-छात्रकेन्द्रित-शिक्षां निर्माति।

अस्याः संस्कृत-अ.प.पा.रूपरेखायाः प्रमुखवैशिष्ट्यमस्ति यत् पाठ्यक्रमस्य प्रकृतेः आवश्यकतायाश्च अनुसारं विशिष्टमूल्याकलनविधेः प्रस्तुतीकरणम्, यस्योल्लेखः प्रसङ्गानुगुणं पाठ्यक्रमस्य अन्ते वर्तते।

अ.प.पा.रूपरेखामाध्यमेन संस्कृतशिक्षायाः समुन्नयनम्
(Innovating Sanskrit Education through LOCF)

संस्कृतभाषा प्राचीना गहना च वर्तते। एषा भारतस्य समृद्ध-बौद्धिकपरम्पराणां (यथा – भारतीयज्ञानपरम्परा, दर्शनं, सांस्कृतिकप्रथाः इत्यादयः) पुनरुत्थानाय संरक्षणाय च महत्त्वपूर्णा विद्यते। अङ्कीययुगे यथा यथा विश्वं अग्रे गच्छति तथा तथा आधुनिकशैक्षणिक-व्यावसायिक-आवश्यकतानां पूर्तये संस्कृतशिक्षायाः अनुकूलनस्य महत्त्वं वर्धते। राष्ट्रियशिक्षानीत्या (२०२०) सह सम्बद्धा अधिगमपरिणाम-आधारित-पाठ्यचर्यारूपरेखा (अ.प.पा.रू.) संस्कृतशिक्षायाः कृते नमनीयं, छात्रकेन्द्रितं, परिणामाधारितं च पाठ्यक्रमं परिकल्पयति। संस्कृतस्य समृद्धनिधिः समकालीनशैक्षणिकविषयैः सह मिश्रणं क्रियते, येन छात्राः भविष्ये नवाचाराणां कृते प्राचीनज्ञानस्य उपयोक्तुं शक्ष्यन्ति। एषा रूपरेखा सुनिश्चिनोति यत् छात्राः न केवलं भाषायां प्रावीण्यम् अधिगच्छेयुः, अपितु पारम्परिक-आधुनिक-ज्ञानक्षेत्रयोः सार्थकरूपेण योगदानं कर्तुम् आवश्यकं कौशलम् अपि प्राप्नुयुः।

राष्ट्रियशिक्षानीतिः (२०२०) निम्नलिखितेषु मुख्यक्षेत्रेषु **संस्कृतस्य संस्कृतज्ञानपरम्परायाश्च** एकीकरणे बलं प्रददाति -

1. **संस्कृतभाषायाः प्रोन्नयनम् (Promotion)**
   - प्रमुखभाषारूपेण संस्कृताध्ययनस्य प्रोन्नयनाय रा.शि.नीतिः (२०२०) बलं प्रददाति। एषा नीतिः विद्यालय-विश्वविद्यालयोश्च विभिन्नस्तरेषु संस्कृतभाषाध्ययनं प्रोत्साहयति। तथा अन्यविषयाणां, यथा - मानवविज्ञान-सामाजिकविज्ञानयोः, शिक्षणस्य माध्यमः संस्कृतभाषा भवेदिति नीतिरियम् उद्घोषयति।
2. **भारतीयज्ञानपरम्परायाः पुनरुद्धारः**
   - राष्ट्रियशिक्षानीत्या (२०२०) आधुनिकशिक्षायाः स्वरूपनिर्माणे भारतीयज्ञानपरम्परायाः महत्त्वम् अभ्युपगम्यते। आधुनिकसन्दर्भेषु भारतीयज्ञानपरम्परायाः संरक्षणाय, प्रवर्धनाय, अनुप्रयोगाय च शैक्षिकरूपरेखायां भारतीयज्ञानपरम्परायाः संयोजनं संरेखणं वा अस्याः नीत्याः उद्देश्यम्।
3. **संस्कृतशिक्षायाः बहुशास्त्रीयदृष्टिकोणः**
   - राष्ट्रियशिक्षानीतिः (२०२०) संस्कृतस्य अन्यविषयैः (यथा - आधुनिकविज्ञान-मानवविज्ञान-नीतिशास्त्र-प्रौद्योगिकीत्यादिभिः) सह एकीकरणस्य महत्त्वं ज्ञापयति। बहुशास्त्रीयदृष्टिकोणमाध्यमेन छात्राः वैश्विकोत्कर्षपुरस्सरं संस्कृते अनुसन्धातुं प्रोत्साह्यन्ते।
4. **संस्कृते अनुसन्धानं नावीन्यञ्च**
   - रा.शि.नीतिः (२०२०) भारतीयसंस्कृतेः, इतिहासस्य, साहित्यस्य, दर्शनस्य च अवगमने संस्कृतस्य भूमिकाम् अभिज्ञाय संस्कृते शोधं कर्तुं तथा तस्य शोधस्य अनुप्रयोगार्थं प्रोत्साहयति। रा.शि.नीतिः (२०२०) विश्वविद्यालयान्, संस्थाश्च नूतनशोधपरिकल्पनाः, सहकारिपरियोजनाः च स्वीकर्तुं प्रोत्साहयति। अनेन संस्कृतज्ञानपरम्पराश्च समकालीनवैश्विकशोधकार्येण सह संयोजिताः भवन्ति।

5. संस्कृतशिक्षणशास्त्रस्य पुनरुत्थानम्

- रा.शि.नीतिः (२०२०) संस्कृताध्यापनविधेः आधुनिकीकरणाय अनुशंसां करोति। साम्प्रतिकच्छात्राणां कृते संस्कृतशिक्षणम् अधिकम् आकर्षकं, सुलभं, प्रासंगिकं च कर्तुं प्रौद्योगिक्याः, अङ्कीय-मञ्चानाम्, अन्यनवाचाराणाञ्च लाभः प्रस्तावितः।

6. उच्चशिक्षायां संस्कृतस्य प्रोन्नयनम् (Promotion)

- रा.शि.नीतिः (२०२०) उच्चशिक्षायां संस्कृतस्य महत्त्वं बोधयन्ती, विश्वविद्यालयेषु संस्कृताध्ययनस्य नूतनपाठ्यक्रमाणां कार्यक्रमाणाञ्च विकासाय प्रस्तावान् सूचयति। अनेन विदुषां, संशोधकानां, व्यावसायिकानां च साहाय्यं मिलति येन संस्कृते निहितस्य ज्ञानस्य विभिन्नेषु आधुनिकक्षेत्रेषु च एकीकरणं सम्भवति।

7. संस्कृतं नीतिशास्त्रं च

- नैतिकमूल्यानि, नैरन्तर्याभ्यासाः (Sustainable Practices), सामाजिकदायित्वं च शिक्षणाय संस्कृतं प्रमुखसाधनम्। संस्कृते निहिताः ग्रन्थाः ज्ञानं च पर्यावरणस्य नैरन्तर्यं (Environmental Sustainability), शासनं, सामाजिकन्यायः इत्यादीनां समकालीन-समस्या-सम्बद्धानाम् अंशानां कृते अपेक्षितनैतिक-शिक्षायाः स्रोतरूपेण वर्तन्ते।

8. प्रौद्योगिकी तथा संस्कृतम्

- रा.शि.नीतिः (२०२०) संस्कृतं तस्य ज्ञानप्रणालीं च विश्वे सर्वेषां छात्राणां कृते सुलभतया प्रदातुं प्रौद्योगिक्याः उपयोगं प्रोत्साहयति। अङ्कीययुगे संस्कृतस्य प्रासंगिकतां सुनिश्चित्य नवीनरीत्या संस्कृतस्य शिक्षणाय प्रसाराय च अङ्कीयमञ्चाः, सद्यस्कसंसाधनानि, प्रौद्योगिकीयोपकरणानि च रा.शि.नीतिः (२०२०) संस्तौति।

संस्कृतं भारतीयज्ञानपरम्परा च अद्यतनच्छात्राणां भविष्यत्सन्ततीनां च कृते प्रासंगिकं भवेदिति कृत्वा, तद्द्वयं समकालीनशिक्षायाम्, अनुसन्धाने, अभ्यासे च गतिशीलरूपेण एकीकरणीयमिति कार्यं रा.शि.नीतिः (२०२०) सुनिश्चिनोति।

संस्कृतशिक्षायाः अ.प.पा.रूपरेखा अन्तःशास्त्रीयोपागमं पाठ्यचर्यायां समावेश्य कृत्वा छात्रेषु संज्ञानात्मकवृद्धिं, व्यावसायिकक्षमतां, समीक्षात्मकचिन्तनं, सामाजिकदायित्वं च वर्धयति। तस्याः रूपरेखायाः प्रधानविशेषतास्ति यत् शिक्षणपथि नमनीयता, या च छात्राणां विविधाः आकांक्षाः दक्षताश्च प्रपूरयितुं बहुविधप्रवेशनिर्गमविकल्पान् प्रददाति। प्रमुखसंस्कृतग्रन्थानां समकालीनकौशलस्य च सन्तुलितसमावेशं सम्पाद्य रूपरेखेयं समग्रावबोधस्य समग्रविकासाय च छात्रान् सशक्तीकरोति यश्च समग्रावबोधः परम्परायामाधृतः तथा आधुनिकयुग-उपहूतीः स्वायत्तीकर्तुं योग्यश्च वर्तते।

संस्कृतशिक्षायाः अ.प.पा.रूपरेखायाः प्राथमिकमवधानं न केवलं भाषाविदुषां निर्माणम् अपितु तादृशानां भाविनेतॄणां निर्माणं, ये आधुनिकवैश्विकविषयाणां जटिलताः समाधातुं संस्कृते निहितप्रज्ञायाः उपयोगं कर्तुं शक्नुवन्ति। संस्कृतशिक्षा, अ.प.पा.रूपरेखामाध्यमेन, भाषाप्रवीणतामतिरिच्य किञ्चिद्विशिष्टमेव साधयितुं विनिर्मिता; या शास्त्रीयज्ञानस्य प्रयोगं नैरन्तर्यविकासे (Sustainable Development), आधुनिकविज्ञाने चेत्यादिषु

समकालीनक्षेत्रेषु कर्तुं प्रोत्साहयति। रूपरेखायामस्यां प्रशिक्षिताः छात्राः प्राचीनप्रज्ञायाः आधुनिकवैज्ञानिकाविष्काराणां च मध्ये अन्तरं पूरयितुं सज्जाः भवन्ति, येन ते वर्तमानस्य भविष्यतः च वैश्विकोपहूतीनाम् अभिनवसमाधानं कर्तुं सशक्ताः भवन्ति।

अ.प.पा.रूपरेखा शिक्षायाः चतुर्षु आधारस्तम्भेषु निर्मिता अस्ति यथा - ज्ञानाय आधिगमः (Learning To Know), कर्मणे अधिगमः (Learning To Do), सहजीवनाय अधिगमः (Learning To Live Together), उषितुम् अधिगमः (Learning To Be) चेति। समग्रोपागमोऽयं छात्राणां संज्ञानात्मक-नैतिकविकासौ समृद्धं कर्तुं लक्षितः वर्तते, येन ते द्रुतगत्या परिवर्त्यमानजगतः मार्गदर्शनं कुर्वन्तः समीक्षात्मकतया नैतिकतया च चिन्तयितुं सज्जाः भवन्ति। अ.प.पा.रूपरेखा-अन्तर्गततया संस्कृतशिक्षा पारम्परिकसंस्कृतग्रन्थेषु निहितेषु नैतिकमूल्येषु बलं ददती सहयोग-उत्तरदायित्व-नैरन्तर्य-विश्वबन्धुत्वभावादीन् आदर्शान् संवर्धयति। वर्धमानवैश्विकाग्रहेषु अ.प.पा.रूपरेखा छात्रान् सामाजिकजीवने पारदर्शि-पर्यावरणानुकूलाभ्यासानां संवर्धनार्थं संस्कृतज्ञानस्य उपयोगं कर्तुं प्रोत्साहयति।

प्रत्येकमपि क्षेत्रे प्रौद्योगिक्याः वर्धमानसमावेशकारणात् संस्कृतशिक्षापि स्वप्रासङ्गिकरूपं रक्षितुं परिवर्तनमनुलक्षते। अत एव अ.प.पा.रूपरेखा आधुनिकवैज्ञानिकसंप्रत्ययान् प्रौद्योगिकीश्च पारम्परिकसंस्कृतज्ञानेन सह समावेशयति। अ.प.पा.रूपरेखान्तर्गतत्त्वेन प्रवर्तिता चयन-आधारित-श्रेयोऽङ्क-व्यवस्था छात्रान् अन्तःशास्त्रीयविषयाणां व्याप्तिमन्वेष्टुं नमनीयतां प्रददाति, येन ते कृत्रिमबुद्धिः, पर्यावरणनैरन्तर्यं, अङ्कीय-मानव-विज्ञानमित्यादिक्षेत्रेषु स्वीयं कौशलं वर्धयन्ति, तथैव संस्कृतग्रन्थानां संस्कृतज्ञानप्रणाल्याश्च समृद्धेः लाभं लभन्ते। एषा नम्यतायुक्तगतिशीलपाठ्यचर्या संस्कृतशिक्षायाः वैश्विकस्तरे प्रतिस्पर्धात्मकम्, अग्रिमचिन्तनशीलं, भविष्यन्नवाचारैः सुसङ्गतं स्थानं सुनिश्चितं करोति।

व्यक्तिगतान्वेषणार्थं नमनीयतायाः अवसरं ददती सर्वासु संस्थासु पाठ्यक्रमाणां मानकीकरणं च सम्पाद्य अ.प.पा.रूपरेखा संस्कृतशिक्षा वैश्विकस्तरे प्रासंगिकी आकांक्षायुक्ता च भवेदिति सुनिश्चिनोति। अ.प.पा.रूपरेखा पारम्परिक-अधिगममार्गपरिधितः छात्रान् बहिरानीय समीक्षात्मकरूपेण चिन्तयितुं, रचनात्मकरूपेण समस्यानिराकरणं कर्तुम्, आधुनिकजगतः आग्रहान् आत्मसात्कर्तुं च प्रोत्साहयति। अ.प.पा.रूपरेखा संरचिता अथापि अनुकूलोपागमः, संस्कृतशिक्षायै नूतनं मापदण्डं स्थापयति, छात्रान् प्रतिस्पर्धात्मके जगति प्रवेष्टुं, नीतिशास्त्रे, ज्ञानस्य संवर्धने च सज्जीकरोति।

संस्कृतभाषा अध्ययनशाखानाम् अध्ययनशाखा
(Sanskrit is Discipline of the Disciplines)

संस्कृतभाषा न केवलं शास्त्रीयभाषा; सा "बहूनाम् अध्ययनशाखानाम् अध्ययनशाखा"। संस्कृतभाषा भारतस्य बौद्धिकप्रज्ञायाः सांस्कृतिकप्रज्ञायाः च आधारभूता। अर्थगाम्भीर्यं, गभीरता, आध्यात्मिकतायाश्च कारणेन पूज्येयं संस्कृतभाषा चिरकालात् एका अध्ययनशाखा, यस्यां बह्व्यः अन्याः अध्ययनशाखाः सन्ति। ताः अध्ययनशाखाः एषा भाषा सदा पोषयन्ती वर्तते। अतः संस्कृतभाषा न केवलं शास्त्रीयभाषा; अपि तु "बहूनाम् अध्ययनशाखानाम् अध्ययनशाखा" इति स्वयं सिद्ध्यति।

संस्कृते बहुविधज्ञानव्यवस्थाः यथा – वेदः, व्याकरणं, तर्कशास्त्रं (न्यायवैशेषिके), दर्शनशाखाः (साङ्ख्ययोग-अद्वैतवेदान्तमध्ववेदान्तविशिष्टाद्वैतवेदान्तादयः) आयुर्वेदः, (चिकित्साशास्त्रं) साहित्यं, पुराणं, धर्मशास्त्रं, गणितं, खगोलशास्त्रं, मनोविज्ञानमित्यादयः समाविष्टाः सन्ति। संस्कृतशिक्षायाः संरचनां व्यापकरूपेण तिसृषु महत्त्वपूर्णधारासु विभक्तुं शक्यते, प्रत्येकमपि ताः शाखाः संस्कृतभाषायाः विशालज्ञानपरम्परायाः प्रचारप्रसाराय विशिष्टरूपेण योगदानं ददति -



1. सामान्यसंस्कृताध्ययनशाखा

अस्यां शाखायां बी.ए. ऑनर्स् (स्नातकस्तरः) तथा एम.ए. (स्नातकोत्तरस्तरः) इति कार्यक्रमौ स्तः। एतौ भाषायाः, तस्याः वाङ्मये, तस्याः ऐतिहासिकविकासे च व्यापक-आधारं प्रदातुं विनिर्मितौ स्तः। अनयोः कार्यक्रमयोः अधोदत्तविषयाणां परिचयः छात्राणां भवितुमर्हति -

- संस्कृतव्याकरणम्
- शास्त्रीयम् आधुनिकं च संस्कृतसाहित्यम्
- काव्यशास्त्रं छन्दःशास्त्रं च
- दर्शनानि
- भाषाविज्ञानं, तुलनात्मकभाषाविज्ञानञ्च
- वेदाः वेदाङ्गानि च

संस्कृतस्य समृद्धेः, भारतीयसंस्कृतेः, अध्यात्मस्य, बौद्धिकपरम्परायाः च विषये तथैव एतेषां सर्वेषामपि प्रभावस्य विषये एतौ बी.ए. ऑनर्स् (Hons.) तथा एम.ए. कार्यक्रमौ जागरूकतां सृजतः। संस्कृताध्ययने गहनतर-अन्वेषणाय सोपान-शिलारूपेण एतौ बी.ए. ऑनर्स् (Hons.) तथा एम.ए. कार्यक्रमौ कार्यं कुरुतः।

2. शास्त्रीय-अध्ययनशाखा

एषा शाखा प्राचीनग्रन्थानां गहनाध्ययनाय तथा तद्व्याख्यायै उद्दिष्टास्ति। एषा शाखा पारम्परिकशास्त्राधारितशिक्षाव्यवस्थायाः केन्द्रभूता वर्तते। अस्यां शाखायां विभिन्नशास्त्रेषु बी.ए. ऑनर्स् (Hons.) तथा एम.ए. कार्यक्रमाः समाविष्टाः सन्ति। यथा -

- व्याकरणम्
- साहित्यम् (शास्त्रीयसाहित्यं काव्यशास्त्रञ्च)
- दर्शनम्
- ज्योतिषम्
- वेदाः
- पुराण-इतिहासौ

एषा शाखा भारतस्य मूलबौद्धिकपरम्पराणां विशिष्टशास्त्राणां च प्रचारप्रसारयोः बलं यच्छति, तथा च तेषु विशिष्टेषु शास्त्रेषु विदुषः उत्पादयति, ये च पारम्परिकभारतीयज्ञानपरम्पराणां (IKS) रक्षकाः वाहकाः च भवन्ति।

3. बहुशास्त्रीय-संस्कृताध्ययनशाखा

संस्कृतस्य आधुनिकोपयोगिताम्, अन्तःशास्त्रीयक्षमतां च स्वीकृत्य बहुशास्त्रीय-संस्कृताध्ययनधारा प्रस्तूयमाना वर्तते। संस्कृतं समकालीनैः अन्यैः विषयैः सह संयोजनाय ये कार्यक्रमाः उपयोगिनः, ते अस्मिन् वर्गे आगच्छन्ति। यथा -

- बी.ए. ऑनर्स् (संस्कृतम् एवं पत्रकारिता)
- बी.ए. ऑनर्स् (संस्कृतम् एवं यात्रापर्यटनम्)
- बी.ए. ऑनर्स् (संस्कृतम् एवं प्रदर्शनकलाः तथा ललितकलाः)
- बी.ए. ऑनर्स् (संस्कृतम् एवं संग्रहालयशास्त्रम्)
- बी.ए. ऑनर्स् (संस्कृतम् एवं पुरातत्त्वम्)
- बी.ए. ऑनर्स् (संस्कृतम् एवं मनोविज्ञानं कल्याणञ्च)
- बी.ए. ऑनर्स् (संस्कृतं तथा अनुवाद-अध्ययनम्)
- बी.ए. ऑनर्स् (संस्कृतम् एवं सामाजिकविज्ञानम्)
- बी.ए. ऑनर्स् (संस्कृतम् एवं रक्षा-अध्ययनम्)
- बी.ए. ऑनर्स् (मन्दिरस्य संस्कृतिः प्रबन्धनञ्च)

एते पाठ्यक्रमाः प्राचीनप्रज्ञाम् आधुनिकविषयैः सह योजने वारिधिरूपकार्यं कुर्वन्ति, येन संस्कृतं न केवलं प्रासंगिकम्, अपितु भविष्यस्य नवीनतायाः अभिन्नाङ्गं भवितुमर्हति।

एवं संस्कृतम् अध्ययनशाखात्वेन पारम्परिक-समकालीनज्ञानव्यवस्थानां विस्तृतं किञ्चिदपूर्वमेव रूपं सम्प्राप्नोति।

अग्रे तिसृषु अध्ययनशाखासु वर्तमानानां कार्यक्रमाणां सूची प्रदर्श्यते -

सामान्यसंस्कृताध्ययनशाखा				
S.No.	**Programme**	**Courses**	**Credits**	**Remarks**
1	B.A. Hons. (Sanskrit)		160	
शास्त्रीय-अध्ययनशाखा				
S.No.	**Programme**	**Courses**	**Credits**	**Remarks**
1	B.A. Hons. (Sahityam)		160	
2	B.A. Hons. (Vyakaranam)		160	
3	B.A. Hons. (Darshanam)		160	
4	B.A. Hons. (Vedanta)		160	
5	B.A. Hons. (Advaita Vedanta)		160	
6	B.A. Hons. (Vishishtadvaita Vedanta)		160	
7	B.A. Hons. (Dvaita Vedanta)		160	
8	B.A. Hons. (Akshara-purushottama Darshan)		160	
9	B.A. Hons. (Bauddha Darshan)		160	
10	B.A. Hons. (Jain Darshan)		160	
11	B.A. Hons. (Mimamsa)		160	
12	B.A. Hons. (Nyaya & Vaisheshika)		160	
13	B.A. Hons. (Sankhya Yoga)		160	
14	B.A. Hons. (Ved-Karmakanda-Paurohitya)		160	
15	B.A. Hons. (Siddhanta Jyotisha)		160	
16	B.A. Hons. (Phalita Jyotisha)		160	
17	B.A. Hons. (Vastu Shastra)		160	
18	B.A. Hons. (Temple Culture and Management)		160	
19	B.A. Hons. (Purana Itihasa)		160	
बहुशास्त्रीय-संस्कृताध्ययनशाखा				
S.No.	**Programme**	**Courses**	**Credits**	**Remarks**
1	B.A. Hons. (Sanskrit and Linguistics)		160	
2	B.A. Hons. (Sanskrit and Journalism)		160	
3	B.A. Hons. (Sanskrit and Travel Tourism)		160	
4	B.A. Hons. (Sanskrit, Performing Arts and Fine Arts)		160	
5	B.A. Hons. (Sanskrit and Museology)		160	
6	B.A. Hons. (Sanskrit and Archaeology)		160	

7	B.A. Hons. (Sanskrit & Psychology and Wellbeing)		160	
8	B.A. Hons. (Sanskrit and Translation Studies)		160	
9	B.A. Hons. (Sanskrit and Social Sciences)		160	
10	B.A. Hons. (Sanskrit and Defence Studies)		160	

संस्कृतशिक्षायाः अधिगमस्य उद्देश्यानि
(Learning Objectives for Sanskrit Education)

उच्चशिक्षायाः विभिन्नस्तरेषु संस्कृतपाठ्यचर्यायाः कानिचन सामान्योद्देश्यानि एवं सन्ति -

- ❖ संस्कृतपाठ्यचर्यायाम् अन्तःशास्त्रीयाधिगमं नैतिकमूल्यानि च समावेश्य समग्रविकासस्य प्राप्तिः, संस्कृतस्य सांस्कृतिकपारम्परिक मूलानां रक्षणपुरस्सरम् आधुनिकोपहूतीनाम् आत्मसात्करणाय छात्रसज्जा।
- ❖ संस्कृतपाठ्यचर्यायाम् आधुनिकवैज्ञानिकप्रौद्योगिकीनां समावेशं कृत्वा छात्राणां कौशलवर्धनम्।
- ❖ पारम्परिकसंस्कृताध्ययनस्य तथा समकालीनक्षेत्राणां (यथा अङ्कीयमानवविज्ञानं (Digital Humanities), पर्यावरणविज्ञानं, कृत्रिमबुद्धिः इत्यादयः) मध्ये अन्तरस्य पूरणम्।
- ❖ आजीवनाधिगमं संवर्धयितुं नमनीयतायुक्तशैक्षणिकमार्गाणां कल्पनं, कौशलोन्नयनं, वैयक्तिकाधिगमानुभवकल्पनं, यच्च वैयक्तिकवृद्धये व्यावसायिकवृद्धये च छात्रान् सशक्तीकरोति।
- ❖ सामाजिक-आर्थिकविषमताः निवार्य विभिन्नसामाजिकपृष्ठभूमिवतां छात्राणां शैक्षिकावसरान् पूरयितुम् उद्दिष्टानां समावेशिशिक्षा-वैविध्यपूर्णशिक्षा-वैकल्पिकशिक्षाणां माध्यमेन समतायाः शिक्षासौलभ्यतायाः (Equity and Accessibility) सुनिश्चयः।
- ❖ क्षमताधारिताधिगमे विशिष्टं ध्यानं, यच्च समीक्षात्मकचिन्तनं, समस्यासमाधानक्षमतां, संस्कृतज्ञानस्य वास्तविकजगति अनुप्रयोगं वर्धयति।

संस्कृतशिक्षायाः अधिगमपरिणामाः
(Learning Outcomes for Sanskrit Education)

अ.प.पा. रूपरेखायाः अन्तर्गतत्त्वेन संस्कृतशिक्षायाः अधिगमपरिणामेषु विषयवैशिष्ट्य-सामान्यकौशलानां च विस्तृतश्रेणी समाविष्टा भवति, येन छात्राः अग्रे शैक्षणिककार्याय, व्यावसायिकवृत्तये, दायित्वपूर्णनागरिकतायै योगदानं दातुं सुसज्जाः भवन्ति। कार्यक्रमसमाप्तेः परं छात्राः अधोदत्तदक्षताः प्रदर्शयितुं शक्ताः भविष्यन्ति।

- **संस्कृतस्य विस्तृतज्ञानम् :** छात्राः संस्कृतव्याकरणस्य, साहित्यस्य, शास्त्रीयग्रन्थानां च गभीरज्ञानं प्राप्नुयुः, यच्च संस्कृते, भारतीयदर्शने, भाषाविज्ञाने, सांस्कृतिकाध्ययनेषु च उन्नताध्ययनाय सुदृढम् आधारं प्रदास्यति।
- **अन्तःशास्त्रीयज्ञानम् अनुप्रयोगश्च :** छात्राः संस्कृतज्ञानम् आधुनिकोपहूतिषु, यथा - पर्यावरणनैरन्तर्यम्, अङ्कीयमानवविज्ञानम् इत्यादिषु, प्रयोक्तुं सक्षमाः भवन्ति। ते प्राचीनप्रज्ञां समकालीनवैज्ञानिकनवाचारैः सह संलग्नीकरिष्यन्ति।
- **समस्या-समाधानं नवाचारश्च:** पारम्परिकसंस्कृतग्रन्थैः सह संलग्नाः भूत्वा छात्राः जटिलसमस्यानां विश्लेषणस्य क्षमतां विकासयिष्यन्ति तथा नवीनसमाधानानि प्रदास्यन्ति, एतेन प्राचीनज्ञानं आधुनिकवैज्ञानिकाभ्यासाः च एकीकृताः भवन्ति।

- **नैतिकसामाजिकदायित्वम् :** छात्राः संस्कृते निहितानि नैतिकमूल्यानि, यथा सामाजिकन्यायः, नैरन्तर्यं (Sustainability), विश्वबन्धुत्वं चेत्यादीनि अवगम्य तानि मूल्यानि संवर्धयिष्यन्ति। ते स्वस्य वैयक्तिकजीवने व्यावसायिकजीवने च निष्ठया नेतृत्वं कर्तुं सज्जाः भविष्यन्ति।
- **अनुसन्धानं विश्लेषणात्मककौशलानि च :** अ.प.पा.रूपरेखायाः अन्तर्गतत्त्वेन संस्कृतशिक्षा समीक्षात्मक-चिन्तनस्य, शोधक्षमतानां, विश्लेषणात्मककौशलानां च संवर्धनं करिष्यति, येन छात्राः शैक्षणिकानुसन्धानाय विभिन्नक्षेत्रेषु व्यावहारिकानुप्रयोगाय च सार्थकं योगदानं कर्तुं समर्थाः भविष्यन्ति।

अ.प.पा.रूपरेखायाः माध्यमेन संस्कृतशिक्षायाः प्रमुखं लक्ष्यमस्ति यत् - प्राचीनज्ञानस्य आधुनिकनवाचाराणां च मध्ये अन्तरं पूरयितुं समर्थानां विदुषां व्यावसायिकानां (Professionals) च निर्माणम्। संस्कृतेन सह आधुनिकविज्ञानस्य, प्रौद्योगिक्याः, नैतिकाभ्यासानां च समावेशेन अ.प.पा.रूपरेखा एतत् सुनिश्चिनोति यत् छात्राः न केवलं भारतीयज्ञानपरम्परायाः (IKS) संवर्धने योगदानं ददति, अपितु समकालीनजगतः सापेक्षोपहूतीनां निवारणाय ज्ञानस्यापि लाभं प्राप्नुवन्ति।

समकालीनशिक्षायां संस्कृतं तस्य प्रासंगिकता च
(Sanskrit and its Relevance in Contemporary Education)

रा.शि.नीत्या (२०२०) संलग्ना संस्कृतशिक्षा भारतीयज्ञानपरम्परायाः (IKS) संवर्धनाय प्रोन्नयनाय च पुनः प्रकल्पिता वर्तते। शिक्षणपद्धतीनाम् आधुनिकीकरणेन, संस्कृते नवीनतमवैज्ञानिकानुसन्धानस्य समावेशेन, संस्कृतम् अधिक-आकांक्षिणं प्रासंगिकं च कुर्वती, अ.प.पा.रूपरेखा सर्वासु अध्ययनशाखासु महत्त्वपूर्णघटकरूपेण संस्कृतशिक्षायाः पुनरुत्थानं कर्तुं प्रयतते। अस्याः रूपरेखायाः प्रमुखमुद्देश्यं वर्तते यत् भारतस्य प्राचीनप्रज्ञायाः आधुनिकयुगस्य नवाचाराणां च मध्ये सेतुत्वेन संस्कृतस्य निर्माणं, येन भाविसन्ततयः अनया कालातीतभाषया लाभं लभेरन्।

सम्प्रति संस्कृतं न केवलं भारतस्य सांस्कृतिकबौद्धिकपरम्परावगमने अपितु आधुनिकवैज्ञानिकप्रौद्योगिकीनां भविष्यत्स्वरूपनिर्माणेऽपि सहायकं भवति। अ.प.पा.रू. स्वीयनूतनपाठ्यचर्यया सुनिश्चिनोति यत् संस्कृतम् एकविंशशताब्द्याः उपहूतीनां निवारणे प्रासंगिकं स्यात्, आकांक्षायुक्तं स्यात्, अपारमूल्यस्रोतश्चापि स्यादिति।

संस्कृतं भारतीयज्ञानपरम्परायाः (IKS) एकीकरणस्य आधारः
(Sanskrit is Base for the Integration of IKS)

संस्कृतं भारतीयज्ञानव्यवस्थानां भाषिकः अवधारणात्मकश्च आधारः। प्राचीनभारतीयप्रज्ञायाः विशालं वाङ्मयं यथा – आयुर्वेदः, योगः, दर्शनानि, वास्तुशास्त्रं, न्यायवैशेषिकबौद्धदर्शनानि (तर्कशास्त्रं), खगोलशास्त्रमित्यादयः मुख्यतया संस्कृतभाषायां विलसन्ति। संस्कृतस्य भाषासंरचना, पारिभाषिकशब्दकोशः, दार्शनिकगहनता च भारतीयज्ञानपरम्परायाः (IKS) विविधधाराणाम् अभिगमनाय, व्याख्यानाय, एकीकरणाय च आदर्शमाध्यमाः। एवं पारम्परिकभारतीयज्ञानस्य बहुविधविद्याक्षेत्राणाम् एकसूत्रेण बन्धने सामञ्जस्यस्थापने च संस्कृतमेव सूत्रधारः।

प्रायः सर्वे पारम्परिकाः विषयाः शास्त्राणि वा यथा - व्याकरणं, दर्शनं, ज्योतिषम्, अर्थशास्त्रं, नाट्याशास्त्रमित्यादयः सहस्राब्देभ्यः पूर्वमेव संस्कृते रचिताः, प्रसारिताश्च सन्ति। संस्कृतस्य व्यवस्थितं व्याकरणं, समृद्धशब्दकोशः, दार्शनिकस्पष्टता च **संस्कृतं न केवलं भाषा अपितु ज्ञानसृष्टेः अभिव्यक्तेश्च शक्तिशालिसाधनमिति** निरूपयति।

प्राचीनज्ञान-आधुनिकनवाचारयोः सेतुत्वेन संस्कृतशिक्षायाः परिवर्तनम्
(Transforming Sanskrit Education: Bridging Ancient Knowledge and Modern Innovations)

भारतीयशिक्षाव्यवस्था आबहोःकालात् औपनिवेशिकरूपरेखाभिः प्रभाविता विद्यते, येन छात्राः संस्कृतात्, भारतीयज्ञानपरम्परायाः (IKS) देशस्य समृद्धज्ञानाच्च वञ्चिताः। राष्ट्रियशिक्षानीतिः (२०२०) स्वनीत्याधारेण पुनः भारतस्य ज्ञानपरम्परया, संस्कृतेन च सह छात्रान् योजयितुं, वर्तमानम् अन्तरं च पूरयित्वा महत्परिवर्तनमिच्छति। परिवर्तनेऽस्मिन् भारतीयसंस्कृतेः बौद्धिकपरम्परायाः च आधारशिलारूपेण संस्कृतशिक्षा महत्त्वपूर्णभूमिकां निर्वहति। विश्वविद्यालय-अनुदान-आयोगेन (UGC) सर्वाङ्गीण-भाविशिक्षा-प्रतिरूपत्वेन संस्कृतस्य विनूतना अधिगम-परिणाम-आधारित-पाठ्यचर्या-रूपरेखा (अ.प.पा.रू.) रा.शि.नीत्या (२०२०) सह समन्वयं कृत्वा, संस्कृतज्ञानपरम्पराम् (SKS) आधुनिक-प्रगत्युन्मुखेन संयोज्य निर्मीयते।

1. भारतीयदर्शनं - संस्कृतशिक्षा

भारतीयदर्शनं मूलतः संस्कृतग्रन्थेषु उल्लिखितमासीत्। संस्कृतसाहित्यं वेदादारभ्य उपनिषदः, न्याय-सांख्य-वेदान्तादिदर्शनपर्यन्तम् अस्तित्व(Ontology)-आध्यात्मिक-नैतिकप्रश्नानां गहनतया अवलोकयति। पाठ्यक्रमे एतेषां ग्रन्थानां समावेशः भारतीयज्ञानमीमांसायाः, अस्तित्वशास्त्रस्य (Ontology) च संरचनात्मक-गवेषणे साहाय्यमाचरति। प्राचीनगुरुकुलव्यवस्था शारीरिक-भावात्मक-संज्ञानात्मक-आध्यात्मिकवृद्धौ बलं ददाति। संस्कृतशिक्षायां प्रागेव विद्यमानानि इमानि प्रधानमूल्यानि नैतिकचिन्तनं, दायित्वपूर्णवैदुष्यं, नैरन्तर्य-बौद्धिक-अभ्यासांश्च (Sustainable Intellectual Practices) प्रोत्साहयन्ति।

2. संस्कृतस्य भारतीयज्ञानपरम्परायाः च ऐतिहासिकमूलाधाराः

संस्कृतं भारतस्य बौद्धिकपरम्पराणाम् आधारशिलास्ति, यस्मिन् वेद-उपनिषत्-स्मृत्यादिग्रन्थाः सन्ति यत्र च विज्ञान-गणित-दर्शन-शासन-कला-विषयिणी आधारभूत-अन्तर्दृष्टिः प्राप्यते। भारतस्य संस्कृतविद्वत्तायाः परम्परा, ज्ञानाय तस्याः योगदानं च सहस्राब्देभ्यः पूर्वतनम् अस्ति। प्राचीनसंस्कृतग्रन्थानाम् अध्ययनेन वैज्ञानिकाविष्काराणां, नैतिकदर्शनस्य, कलानां च समृद्धः इतिहासः ज्ञायते। वेद-उपनिषत्-स्मृति-आदिभिः प्रारम्भिकसंस्कृतग्रन्थैः प्राचीनभारते सामाजिक-सांस्कृतिक-आर्थिकप्रथानाम् आधारः स्थापितः वर्तते।

संस्कृतपाठ्यचर्या छात्रान् प्राचीनज्ञानेन, मूल्यैः, नीतिशास्त्रेण, वैज्ञानिकज्ञानेन, दार्शनिकविचारैश्च सह संलग्नान् करोति। ज्योतिषं (खगोलशास्त्रं), न्यायदर्शनं, जीवविज्ञानम् (आयुर्वेदादि), तथा स्थापत्यविद्या (वास्तुकला) इत्यादयः आधुनिक-अन्तःशास्त्रीय-शिक्षां प्रेरयिष्यन्ति। संस्कृत-ग्रन्थाः समकालीनानुसन्धानाय समकालीनाविष्करणेभ्यः उत्कृष्टरूपरेखाः प्रददति।

3. संस्कृतशिक्षायाः मौलिकसिद्धान्ताः

संस्कृतशिक्षा सहजतयैव गभीरभारतीयबौद्धिकपरम्परायाः संवर्धनेन सङ्क्रमणेन च भारतीयविदुषां योगदानस्य मूर्तरूपं ददाति। पाठ्यक्रमाः संस्कृत-आचार्याणां यथा गौतमः (न्यायशास्त्रं), कणादः (वैशेषिकं), पतञ्जलिः (महाभाष्यं) चेत्यादिभिः कृतिभिः - क्रमशः दर्शनशास्त्रे, तर्कशास्त्रे, भाषाविज्ञाने, प्रधान-गौणविषयेषु च

निहिताः सन्ति। एतदतिरिच्य संस्कृतशिक्षा सत्यं, धर्मः, अहिंसा, अस्तेयम् इत्यादीनि प्रमुखमूल्यानि छात्रेषु सङ्क्रामयति। इमानि दायित्वपूर्णवैदुष्याय महत्त्वपूर्णानि भवन्ति। इत्थं संस्कृतपाठ्यचर्या अधोलिखितान् अंशान् केन्द्रीकरोति -

• **समीक्षात्मकचिन्तनं समस्यासमाधानं च** – न्यायवैशेषिके, मीमांसा चेत्यादीनि दर्शनानि समकालीनोपहूतीः निराकरणयोग्यतावर्धकाः तार्किकव्याख्याः प्रस्तुवन्ति।

• **अन्तःशास्त्रीयज्ञानम्** – संस्कृतेन सह विज्ञानं, सामाजिकविज्ञानम् इत्येवं संयुक्ताध्ययनस्य प्रोत्साहनेन आधुनिक-प्राचीनज्ञानयोः समग्रावबोधः जायते।

4. आधुनिकविषयैः सह समन्वयः

आधुनिकयुगे संस्कृतशिक्षायाः प्रासंगिकतां बहुशास्त्रीयोपागमः वर्धयति। रा.शि.नीत्याः (२०२०) विचारस्तावत् –

- अध्ययनशाखाभेदानाम् अपाकरणम्।
- तादृशपाठ्यचर्यायाः निर्माणं यस्याः आधारः भारतीयता स्यात्।
- आधुनिकाध्ययनशाखाभिः सह पारम्परिकाध्ययनशाखानां संयोजनम्।

संयोजनाय प्रमुखक्षेत्राणि -

- **प्रौद्योगिकी - संस्कृतग्रन्थानां** विश्लेषणार्थं संवर्धनार्थं च कृत्रिमबुद्धेः यन्त्राधिगमस्य च उपयोगः।
- **नैरन्तर्यम् (Sustainability) -** संस्कृतग्रन्थेभ्यः पर्यावरणदायित्वेन, नैरन्तर्यजीवनेन, हरितप्रौद्योगिक्या च सम्बद्धानां सन्दर्भाणाम् अन्वेषणम्।
- **सांस्कृतिकाध्ययनानि** - कथं संस्कृतवाङ्मयं वैश्विकसंस्कृतेः आदानप्रदाने प्रभावयतीति, तत्रापि प्राचीनसंस्कृतग्रन्थेभ्यः वैश्विकदर्शनं वैश्विकवाङ्मयञ्च प्रभावयतां केषाञ्चन महत्त्वपूर्ण-अध्ययनानां विषये ज्ञानप्राप्तिः।
- **अन्तःशास्त्रीयपरियोजनाः** - छात्राः तादृशपरियोजनाकार्येषु प्रोत्साहनीयाः यत्र संस्कृतेन सह आधुनिकप्रौद्योगिकी युक्ता स्यात्, यथा - तन्त्रांशनिर्माणं (Creating Apps), अथवा कृत्रिमबुद्धि-सञ्चालितसंस्कृतानुवादः इत्यादयः।

5. वैश्विकज्ञाने भारतीयानां (भारतस्य) योगदानम्

वैश्विकज्ञानविज्ञानविस्तारे संस्कृतमाध्यमेन भारतीयानां वैचारिकं योगदानं गहनं विद्यते। गणितं, विज्ञानं, भाषाशास्त्रं, चिकित्साशास्त्रं, दर्शनं, कला चेत्यादिषु विविधेषु क्षेत्रेषु योगदानमेतत् सुविस्तृतम् अवलोक्यते। भारतस्य प्राचीनप्रज्ञायाः भारतीयज्ञानपरम्परायाश्च वैश्विकस्तरे चिरकालं यावत् कृतानि योगदानानि तेषां मूलस्रोतांसि च यथायोग्यं संस्कृतश्लोकैः सह अधः प्रदर्श्यन्ते -

वैश्विकज्ञानविज्ञानस्य कृते भारतीयानां योगदानम्

क्र.सं.	क्षेत्रम्	योगदानम्	प्राचीनग्रन्थः / स्रोतः	विवरणम्
1	गणितम्	शून्यस्य दशमलवपद्धतेश्च सङ्कल्पना।	ब्रह्मस्फुटसिद्धान्तः (ब्रह्मगुप्तेन विरचितः ७ शताब्दः)	ब्रह्मगुप्तेन शून्यसंख्यासम्बद्धाः ऋणसंख्यासम्बद्धाश्च गणनाविधयः परिकल्पिताः, यैश्च आधुनिकसंख्यापद्धतेः गणनायाश्च आधारः स्थापितः।
2	खगोलशास्त्रम्	सौर-चन्द्रग्रहणानां, ग्रहाणां च गतेः यथार्थगणना।	सूर्यसिद्धान्तः	विस्तृतं खगोलीयपरीक्षणं नियमाश्च पाश्चात्यान्वेषणात् पूर्वमेव अस्मिन् ग्रन्थे स्थापितम्। सूर्यसिद्धान्ते कालखण्डविभाजनम्, अक्षांशस्य अवनतिः (Axial Tilt) इत्यादयः अन्यविषयाः वर्णिताः।
3	आयुर्वेदः (चिकित्सा)	समग्रचिकित्साविधिः। शारीरिकमानसिकाध्यात्मिक-स्वास्थ्यसंरक्षणम्।	चरकसंहिता सुश्रुतसंहिता इत्यादयः।	विश्वे प्राचीनतमं चिकित्साशास्त्रम् आयुर्वेदः विद्यते, यत्र रोगानां निवारणं, निदानम्, शस्त्रकर्म, औषधोपचारश्च वर्णिताः।
4	शल्य-चिकित्सा	उन्नतानि शल्य-उपकरणानि, तत्प्रविधयश्च – यथा नासिकानिर्माणम्, नेत्रचिकित्सा (Cataract) इत्यादयः।	सुश्रुतसंहिता	सुश्रुतः "शल्यतन्त्रस्य जनकः" इति ख्यातः। सुश्रुतस्य विस्तृतशस्त्रविधयः अरबिकभाषायाम् अनूदिताः, येन वैश्विकचिकित्सायामस्य प्रभावः दृश्यते।
5	भाषाशास्त्रम्	ध्वनिविज्ञानं, व्याकरणञ्चेति (औपचारिकभाषाशास्त्रस्य आरम्भः)	पाणिनेः अष्टाध्यायी	आधुनिकभाषाशास्त्रस्य आदिमं स्वरूपमिव पाणिनेः व्याकरणमभ्युपगम्यते, यत्र पदनिर्माणनियमाः, औपचारिकभाषासिद्धान्ताः बीजगणितीयपद्धतयश्च दृश्यन्ते, अस्य व्याकरणस्य रचनाशैली आधुनिकसंगणकविज्ञानमपि प्रेरयति।
6	गणितीयानन्तता	"अनन्तता" (Infinity) इत्यस्य संकल्पना, गणनाशास्त्रस्य आधारः।	'अस्मिन् विकारः खहरे न राशावपि प्रविष्टेष्वपि निः सृतेषु।	भारतीयचिन्तकाः पाश्चात्यगणितस्य अपेक्षया बहुपूर्वमेव अनन्ततायाः निरन्तरतायाश्च अवधारणाम् अवगतवन्तः, यच्च गणितस्य आधुनिकसिद्धान्तानां च कृते महत्त्वपूर्णं वर्तते।

			बहुष्वपि स्याल्लयः सृष्टिकालेऽनन्तेऽच्युते भूतगणेषु यद्वत्। - बीजगणितम् 2.20 भास्कराचार्यः द्वितीयः	
7	धातुविज्ञानम् (Metallurgy)	उन्नतधातुविज्ञानकला (Advanced Metallurgy) यथा - अक्षलोहं (अपक्षीयं लोहम्, जस्त्रस्य आस्वादनम्, Rust-Resistant Iron, Zinc Distillation) इत्यादयः।	पुरातात्त्विकस्थलानि (Archaeological Sites) यथा - दिल्लीलोहस्तम्भः, जावर-र्माइन्स् इत्यादयः।	भारतदेशे उत्कृष्टं लोहनिर्माणम् (उदाहरणतया - वुट्स् इस्पात्), अपक्षीयस्तम्भनिर्माणं, जस्त्रास्वादनकौशलं च पाश्चात्त्यदेशेभ्यः पूर्वमेव विकसितम्।
8	दर्शनं मनोविज्ञानञ्च	मनसः सिद्धान्तः, चैतन्यसिद्धान्तश्चेति।	उपनिषदः, पतञ्जलिमुनेः योगसूत्राणि।	भारतीयदर्शनं मनःप्रक्रियाम्, आत्मबोधं, चैतन्यं, संज्ञानं च विशदतया विवृणोति, यत् आधुनिकमनोविज्ञानात् पूर्वमेव विकसितम्।
9	शिक्षा	आदर्शभूता गुरुकुलपद्धतिः, तक्षशिला-नालन्दाद्याः विश्वविद्यालयाः।	अर्थशास्त्रं, मनुस्मृतिः, बौद्धग्रन्थाश्च।	प्राचीनभारते विविधविषयेषु, यथा न्यायः, चिकित्सा, व्याकरणं, राजनीतिशास्त्रं, दर्शनं, ज्योतिषञ्चेत्यादयः, शिक्षां प्रदातुं समर्थाः विश्वविद्यालयाः आसन् यत्रानेके वैदेशिकाः आजग्मुः।
10	अर्थशास्त्रं राज्यशासनञ्च	शासनं, करव्यवस्था, कूटनीतिः, गुप्तचरप्रणाली चेति।	अर्थशास्त्रम्	अर्थशास्त्रं राजकीय-आर्थिकशास्त्रस्य ग्रन्थः, ग्रन्थोऽयम् अद्यापि कूटनीतिशास्त्रे व्यवस्थायां च सर्वत्र पठ्यते।

वैश्विकप्रभावः

- अरबिकभाषायामनूदिताः सुश्रुतसंहिता-चरकसंहिता-ब्रह्मस्फुटसिद्धान्ताश्च पारसदेश- (ईरान) स्पेनदेशद्वारा यूरोपदेशं प्राप्ताः, येन पुनर्जागरणविज्ञानस्य (Renaissance Science) आधारः स्थापितः।
- भारतीयाङ्कपद्धतयः बीजगणितविचाराश्च इस्लामिकदेशद्वारा यूरोपे प्रसृताः।
- आधुनिकविषयाणां, यथा भाषाशास्त्रं, शल्यचिकित्सा, मनोविज्ञानं, धातुविज्ञानं, खगोलशास्त्रञ्चेत्यादीनां सर्वेषामपि विषयाणां मूलं संस्कृते प्रचुरतया दृश्यते।

अतः इयं पाठ्यचर्या वैश्विकज्ञानपद्धतिषु संस्कृतस्य योगदानमित्यंशं प्रामुख्येन ज्ञापयति। गणित-खगोलशास्त्र-भाषाशास्त्र-जीवविज्ञानादिषु संस्कृतस्य प्रभावः प्राप्यते। भाषा, तर्कः, नीतिशास्त्रम् इत्यादिषु

विषयेषु संस्कृतयोगदानं केन्द्रीकृत्य पाठनेन छात्राः वैश्विकज्ञानपरम्पराणां परस्परसम्बद्धं गहनतया अवगच्छन्ति, तथा च आधुनिकजगति अर्थपूर्णं योगदानं दातुं समुचितं मार्गं प्राप्स्यन्ति।

6. संस्कृते आधुनिकाः विश्वस्वीकृताश्च विचाराः

प्राचीनसंस्कृतप्रज्ञा अद्यापि आधुनिकविचारपरम्पराणां कृते निरन्तरं योगदानं दीयमाना दृश्यते। कौटिल्यस्य आर्थिकनीतयः वैश्विक-अर्थनीतिप्रबन्धनविषये योगदानं निरन्तरं ददति। धर्मशास्त्राणि, स्मृतयश्च लोकेषु सुसम्बद्धं सामाजिकजीवनं सुनिश्चेतुं जनेषु मिथः सुदृढसम्बन्धकल्पने मार्गं दर्शयन्ति। ऐतिहासिककथाः उदात्तचरितानां सरलजीवनस्य आदर्शान् स्थापयन्ति। पाठ्यक्रमे समाविष्टाः एते संस्कृतविचाराः कथं समकालीनप्रबन्धनं, निर्णयस्वीकरणमित्यादिकं च प्रभावितं कुर्वन्ति इति छात्राः ज्ञास्यन्ति।

रा.शि.नीतिः (२०२०) तथा भारतीयज्ञानपरम्परा (IKS) इत्येतयोः दृष्ट्या शैक्षणिक-एकीकरणाय कतिपयाः वैश्विकरूपेण स्वीकृताः आधुनिकाः संस्कृतविचाराश्च अधोलिखिताः सन्ति -

क्र. सं.	आधुनिकविचारः	संस्कृतपदं / सिद्धान्तः	संस्कृतश्लोकः	आधुनिकप्रासङ्गिकता
1	समग्रस्वास्थ्यविचारः (Wellness)	स्वास्थ्यम्	समदोषः समाग्निश्च समधातुमलक्रियः। प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥ (चरकसंहिता, सूत्रस्थानम् ९.४)	शारीरिकं मानसिकं सामाजिकं च स्वास्थ्यं संरक्षितुं प्रस्तुतोऽयं श्लोकः विश्वस्वास्थ्यसंस्थायाः (WHO) स्वास्थ्यपरिभाषासदृशः विद्यते।
2	चेतनायाः जागरूकता	स्मृतिः ध्यानम्	योगश्चित्तवृत्तिनिरोधः॥ (पातञ्जलयोगसूत्राणि १.२)	योगशास्त्रं ध्यानाभ्यासानाञ्च आधारः।
3	नैरन्तर्यजीवनम् / पारिस्थितिकीतन्त्रम् (Sustainable Living / Ecology)	प्रकृतिपूजनम्	माता भूमिः पुत्रोऽहं पृथिव्याः। (अथर्ववेदः. 12.1.12)	नैरन्तर्यजीवनं वैश्विकपारिस्थितिक्याः नैरन्तर्यपर्यावरणमूल्यैः सह सङ्गतिं स्थापयति।
4	अहिंसा / हिंसानिवृत्तिः	अहिंसा	अहिंसा परमो धर्मः। (महाभारतम्, शान्तिपर्व २६२.५)	शान्तिनिर्माणस्य अहिंसकनागरिकान्दोलनानां च नैतिकाधाराः।
5	योगः समग्रजीवनशैली चेति। (Yoga & Integrated Lifestyle)	अष्टाङ्गयोगः	यमनियमासनप्राणायाम-प्रत्याहार-धारणाध्यानसमाधयोऽष्टावङ्गानि॥ (योगसूत्राणि २.२९)	मानसिक-शारीरिक-स्वास्थ्यसंरक्षणार्थं योगाभ्यासः विश्वपटले स्थापितः।

6	कर्मसिद्धान्तः (Cause & Effect)	कर्मसिद्धान्तः	कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। (भगवद्गीता २.४७)	आधुनिकनैतिकदर्शने, व्यवहारशास्त्रे च प्रभावपूर्णोऽयं सिद्धान्तः।
7	नैतिकसंवादः	सत्यं, प्रियं, हितम्	सत्यं ब्रूयात् प्रियं ब्रूयात् न ब्रूयात् सत्यमप्रियम्। प्रियं च नानृतं ब्रूयात् एष धर्मः सनातनः॥ (मनुस्मृतिः ४.१३८)	रचनात्मकस्य नैतिकस्य च सम्प्रेषणसिद्धान्तः।
8	सन्तुलिताहारः (हिताहारः) (Balanced Diet)	आहारविधिः	हितं मितं च आहारं सेवन्ते ये नराः सदा। ते सर्वं तरयन्त्याशु व्याधीन् कालकृतानपि। (चरकसंहिता, सूत्रस्थानम् २५.३१)	आहारस्य नियमोऽयं पौष्टिकभोजनमहत्त्वं ज्ञापयति।
9	वैश्विकनागरिकता	वसुधैव कुटुम्बकम्	अयं निजः परो वेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्॥ (महोपनिषद् ६.७१)	अन्तःसास्कृतिकसौहार्दं, समावेशं शान्तिञ्च प्रवर्धयति।

7. संस्कृतशिक्षायाः भविष्योन्मुखदृष्टिः-

वैश्विकप्रगत्या सह सङ्गतिं स्थापयितुं छात्राणां वैश्विकप्रवृत्तिषु विशेषज्ञतां सुनिश्चेतुं पाठ्यक्रमे आधुनिकबौद्धिकप्रवृत्तयः (emerging trends) समाविष्टाः सन्ति। यथा - भारतीयतर्कः, प्राकृतिकभाषाप्रक्रिया (NLP), कृत्रिमबुद्धिः (AI), संगणकानुप्रयोगाः इत्यादयः।

8. व्यावहारिकप्रासङ्गिकता वृत्त्यवसराश्च

संस्कृतशिक्षा केवलं सैद्धान्तिकं ज्ञानं न प्रददाति अपि तु तस्य व्यावहारिकमुपयोगं च सुसम्बद्धतया प्रस्तौति। व्यावहारिकप्रासङ्गिकतावृद्ध्यर्थं स्वीकृताः उपक्रमाः -

- **अध्ययनानि (Case Studies) -** संस्कृतग्रन्थेभ्यः प्रेरकानि उदाहरणानि कथाः वा स्वीकृतानि, येन वर्तमाननीतिकाठिन्यस्य समाधानं प्राप्यते।
- **प्रशिक्षुतायाः परियोजनायाश्च अन्तर्गतत्वेन -** संस्कृतशोधपरियोजनानां कृते सांस्कृतिकसंस्थाभिः सह मिलित्वा कार्यकरणं, पाण्डुलिपीनाम् अङ्कीकरणं रक्षणञ्चेति स्वीकर्तुं शक्यते।
- **कौशलविकासकार्यक्रमाः -** संस्कृतस्य अङ्कीयानुवादस्य, भाषाविश्लेषणस्य, संस्कृताधारितसंशोधनस्य च प्रशिक्षणार्थम् अवसराः परिकल्पनीयाः।

9. विषयमाध्यमेन अवसरनिर्माणम् (Creating Opportunities through Subjects)

एषा पाठ्यचर्या निम्नबिन्दून् केन्द्रीकृत्य सिद्धान्तान् प्रायोगिकपक्षेण सह सम्बद्धं कर्तुम्, आवश्यकं वृत्तिकौशलम् आत्मनि विकासयितुं छात्रान् प्रोत्साहयति -

- **अनुभवाधारितशिक्षणम् -** अङ्कीय-मानवविज्ञान-परियोजना। (Digital Humanities Projects)
- **कौशलविकासः** - संस्कृतसंगणकभाषाविज्ञानं, कृत्रिमबुद्धिः, अङ्कीयमानवविज्ञानमित्येतेषां विषयाणामध्यापनम्।
- **औद्योगिकप्रासङ्गिकपाठ्यक्रमः -** आधुनिककाले संस्कृतं लोकप्रियं कर्तुं बहुविषयकपाठ्यक्रमाणां निर्माणं तथा च सम्बद्धविषयेषु संस्कृतज्ञानपरम्पराणां प्रदर्शनम्।
- **अनुसन्धानं नवोन्मेषश्च -** संस्कृतं अन्यैः अध्ययनक्षेत्रैः सह संयोज्य अन्तःशास्त्रीयशोधकार्यस्य प्रोत्साहनम्।

10. पाठ्यक्रमनिर्माणं शिक्षणपद्धतिश्च

पाठ्यक्रमे, अध्यापनविधिषु च संस्कृतस्य आधुनिकविषयाणां च सन्तुलितं समायोजनं प्रतिबिम्बितं भवेत्। संस्कृतविद्भिः, शिक्षाविद्भिश्च एषः पाठ्यक्रमः विकसितः। मार्गदर्शकत्वम् अनुभवात्मकं शिक्षणञ्च प्रवर्धयत् शिक्षणशास्त्रं गुरु-शिष्यपरम्परायाः प्रासङ्गिकतां सूचयति। **आभासीयवास्तविकता (VR), संवर्धितवास्तविकता (AR),** इत्यादयः संस्कृतशिक्षायाः संलग्नतां सुलभतां च वर्धयिष्यन्ति।

रा.शि.नीतिः (२०२०) विश्वविद्यालय-अनुदान-आयोगस्य अ.प.पा.रू. (NEP 2020 and **UGC's LOCF)** इत्येताभ्यां सह समन्वयपुरस्सरं निर्मितैषा संस्कृतशिक्षा वैश्विकदृष्ट्या प्रासङ्गिकी, अथापि अस्याः सांस्कृतिकमूलत्वं भारतीयमेव। एतस्याः माध्यमेन छात्राः न केवलं भारतस्य बौद्धिकपरम्परायाः संरक्षणं वर्धयिष्यन्ति अपितु अधिकाधिकतया प्रौद्योगिकी-सञ्चालिते विश्वे सार्थकं स्वकीयं योगदानं प्रदास्यन्ति।

11. संस्कृतम् अनुसन्धानं च

संस्कृतस्य अधिगमपरिणाम-आधारितपाठ्यक्रमरूपरेखायाः (LOCF) संरचना राष्ट्रियशिक्षानीतेः (२०२०) आधारेण कृता, यस्याः प्रमुखम् उद्देश्यं स्नातकस्तरादेव शोधयोग्यतायाः संवर्धनम्। विश्लेषणात्मककौशलानि, भारतीयज्ञानपरम्परां (IKS) च बोधयन् एषा अ.प.पा.रू (LOCF) छात्राणां कृते समीक्षात्मकरूपेण नवीनतया च चिन्तनाय अपेक्षितं समुचितञ्च वातावरणं कल्पयति।

बी.ए. ऑनर्स् अनुसन्धानम् (B.A. Hons. Research) इति कार्यक्रमस्य आरम्भेण संस्कृतस्नातकाः अधुना साक्षात् शोधकार्यं कर्तुं शक्नुवन्ति, पृथक् स्नातकोत्तरपदवीं प्राप्तुम् अनिवार्यतापि नास्ति। स्नातक-अध्ययनादेव अनुसन्धानं प्रति अग्रेगमनमिति एतस्य कार्यस्य उद्देश्यम् अस्ति यत् -

- मूलसंस्कृतग्रन्थैः शास्त्रैः च सह वैदुष्यपूर्णसंलग्नता।
- व्याकरणं, साहित्यं, दर्शनं, बहुशास्त्रीय-संस्कृताध्ययनशाखा चेत्यादिषु क्षेत्रेषु स्नातकस्तरादेव विशेषज्ञतासम्पादनाय प्रोत्साहनम्।
- अनुसन्धित्सूनां संस्कृतविदुषां कस्यचन नूतनवर्गस्य निर्माणाय पारम्परिक-ज्ञान-व्यवस्थानां सुदृढीकरणम्।

एतत् संशोधनात्मकं पदं न केवलं संस्कृतभाषायाः प्रचार-प्रसाराभ्यां सह सम्बद्धम्, अपितु समकालीनशैक्षणिकबौद्धिकविषयेषु संस्कृतभाषां जीवद्विकसद्-अध्ययनशाखात्वेन निर्माणेनापि सम्बद्धं वर्तते।

संस्कृतस्नातकस्य गुणाः

(GRADUATE ATTRIBUTES IN SANSKRIT)

संस्कृतशिक्षायां स्नातकगुणाः नाम प्रत्येकं पाठ्यक्रमस्य आरम्भे उल्लिखितानाम् अपेक्षितपाठ्यक्रमाधिगमपरिणामानां समवायः भवति। संस्कृतस्नातकः विविधपाठ्यक्रमाणाम् अध्ययनद्वारा यौ लक्षण-गुणौ प्रदर्शयितुं समर्थः भविष्यति तौ अधः सूचीबद्धौ स्तः -

(क) अध्ययनशाखायाः ज्ञानम्

संस्कृतस्थानाम् एकस्याम् अध्ययनशाखायाम् अथवा अधिकासु अध्ययनशाखासु स्थितस्य व्यापकज्ञानावगमनस्य निष्पादनस्य च सामर्थ्यप्राप्तिः।

(ख) सम्प्रेषणकौशलम्

i. सरलमानकसंस्कृतेन विचारसम्प्रेषणे क्षमता।

ii. विज्ञानस्य, मानविकशास्त्राणां (Humanities), सामाजिकविज्ञानस्य, भाषाणां च क्षेत्रे संस्कृतमहत्त्वस्य प्रदर्शनक्षमता।

iii. संस्कृतं न केवलं भाषा अपितु सर्वस्याः अपि समस्तप्राचीनप्रज्ञायाः वाहकम् इति विचारस्य सम्प्रेषणक्षमता।

(ग) समीक्षात्मकचिन्तनम्

i. प्राचीनतर्कं प्राचीनावधारणाः अवगत्य स्वतन्त्ररूपेण चिन्तनं कर्तुं क्षमता।

ii. ऋषिभिः पूर्वं प्रदत्तायाः समृद्धायाः प्रज्ञायाः समीक्षात्मकरूपेण विश्लेषणार्थं चिन्तनक्षमता।

(घ) समस्यानिवारणम्

i. जीवनस्य विभिन्नेषु क्षेत्रेषु स्थितानां विविधसमस्यानां समाधानम् अन्वेष्टुं तथा समुचितपरिणामप्राप्त्यै प्राप्तसमाधानानां प्रयोगक्षमता।

ii. वैधनिष्कर्षाय दत्तांशस्य विश्लेषणं संश्लेषणं कर्तुं तथा अनुमातुं च क्षमता।

iii. सामाजिकीं नैतिकीं वा समस्यां समाधातुं क्षमता। तथा कक्षायाः शिक्षणं दैनन्दिनव्यवहारे प्रयुज्य तस्याः एव समस्यायाः समाधानं प्रदातुं क्षमता।

(ङ) शोधसम्बद्धकौशलानि

i. अन्तःशास्त्रीयशोधं बहुशास्त्रीयशोधं वा कर्तुं क्षमता।

ii. शास्त्रेभ्यः अद्यतनवैज्ञानिकप्रगतेः मूलाधारं ज्ञातुं क्षमता।

iii. शास्त्रेषु कथितां स्थायिजीवनपद्धतिम् अन्वेष्टुं सामर्थ्यम्।

(च) सूचना तथा सम्प्रेषणप्रौद्योगिकी (ICT) अङ्कीयसाक्षरता च

विभिन्नप्रयोजनार्थं सूचनानाम् अन्वेषणाय, विश्लेषणाय, प्रयोगाय च विविधानां प्रौद्योगिकोपकरणानाम् उपयोगस्य क्षमता।

(छ) स्वनिर्देशितशिक्षणम् (Self-Directed Learning)

विविधपरियोजनासु स्वतन्त्रतया कार्यं कर्तुं क्षमता तथा संस्कृतस्य विविधपक्षेषु विस्तृताध्ययनं सुनिश्चेतुं च क्षमता।

(ज) नैतिकता तथा नैतिकजागरूकता

i. अनैतिकव्यवहारं, मिथ्याकरणं, सूचनायाः मिथ्याकरणमित्यादीनाम् अनैतिकव्यवहाराणाम् अभिज्ञानक्षमता।

ii. आत्मनः प्रबन्धनक्षमता।

iii. विविधसामाजिकव्यवस्थानां च प्रबन्धनक्षमता।

(झ) आजीवनम् अधिगमः (Lifelong Learning)

व्यक्तिगतविकासं लक्ष्यीकृत्य स्वगतेः अनुरूपं शिक्षणस्य, स्वनिर्दिष्टस्य शिक्षणस्य च क्षमता।

संस्कृतस्नातकानां योग्यतासंसूचकानि

(QUALIFICATION DESCRIPTORS FOR SANSKRIT GRADUATES)

संस्कृतं किञ्चन क्षेत्रं भवति यत्र वयं सामाजिक-राजनैतिक-न्याय-नैतिकादीनां विभिन्नानां विश्वं प्रभावयतां पक्षाणाम् अध्ययनं कर्तुं प्रवृत्ताः भवेम। तदर्थं संस्कृतस्य संस्कृतशास्त्राणाञ्च बी.ए. (Hons.) कार्यक्रमाणाम् अधोदत्तानि योग्यतासंसूचकानि स्वीकृतानि -

- संस्कृतस्य संस्कृतशास्त्राणाञ्च गहनतया अवबोधस्य प्रदर्शनम्।
- सरलमानकसंस्कृतेन समृद्धप्राचीनप्रज्ञावबोधाय ज्ञानस्य अनुप्रयोगः।
- भारतीयज्ञानपरम्परायाः (IKS) समकालीनज्ञानपरम्पराणां च विस्तृतज्ञानस्य प्रदर्शनम्।
- अर्थशास्त्र-राजनीति-न्याय-गणित-भौतिक-रसायन-विज्ञानादिविषयज्ञानोपेतस्य संस्कृतस्य बहुशास्त्रियोपागमत्त्वेन प्रदर्शनम्।
- समकालीनविषयाणां व्यापकं ज्ञानं, चितक्षेत्रसम्बद्धः वैदुष्यपूर्णशोधः, समकालीनविषयावगमनाय आवश्यककौशलानां प्रविधीनां च प्रदर्शनम्।

श्रेयोऽङ्कवितरणम्
(CREDIT DISTRIBUTION)

श्रेयोऽङ्कः कश्चन एककः येन पाठ्यक्रममापनं क्रियते। अयं प्रतिसप्ताहम् आवश्यकानां संसूचनाहोराणां (Instructional Hours) संख्यां निर्धारयति। एकः श्रेयोऽङ्कः प्रतिसप्ताहम् एकहोरात्मक-अध्यापनेन (व्याख्यानेन अनुशिक्षणेन वा) अथवा होराद्वयस्य प्रायोगिककार्येण/क्षेत्रकार्येण समानः भवति।

उपाधिप्राप्तये प्रत्येकमपि श्रेण्यां आवश्यकाः न्यूनतमश्रेयोऽङ्काः

(Minimum Credit Requirements to Award Degree under Each Category)

क्र.सं.	विस्तृतपाठ्यक्रमश्रेणी	वि.अ.आयोगानुगुणं (UGC) आवश्यकन्यूनतमश्रेयोऽङ्काः	
		त्रिवर्षीय-स्नातकपाठ्यक्रमः	चतुर्वर्षीय-स्नातकपाठ्यक्रमः
1	प्रधानपाठ्यक्रमः (Major Course)	६०	८०
2	गौणपाठ्यक्रमः (Minor Course)	२४	३२
3	बहुशास्त्रीयपाठ्यक्रमः (Multidisciplinary)	०९	०९
4	क्षमतावर्धनपाठ्यक्रमाः (Ability Enhancement Courses)	०८	०८
5	कौशलवर्धनपाठ्यक्रमाः (Skill Enhancement Courses)	०९	०९
6	मूल्यवर्धनपाठ्यक्रमाः – स्नातकस्तरे सर्वेषां कृते (Value Added Courses common for all UG)	०६–०८	०६–०८
7	ग्रीष्मकालीनप्रशिक्षुता (Summer Internship)	०२–०४	०२–०४
8	अनुसन्धानपरियोजना/लघुशोधप्रबन्धः	———	१२
	योगः	**१२०**	**१६०**

1. प्रधानपाठ्यक्रमः (Major Course or Core)

एषः पाठ्यक्रमः छात्रेण/छात्रया वा स्वपाठ्यक्रमे अनिवार्यतया अध्येयः।

2. गौणपाठ्यक्रमः (Minor Course)

एषः पाठ्यक्रमः छात्रस्य/छात्रायाः वा स्वचितविषयेण सम्बद्धः (एकलशास्त्रीयम्) अथवा स्वचितैः विषयैः सम्बद्धः (बहुशास्त्रीयम्) श्रेयोऽङ्कपाठ्यक्रमसमूहः भवति।

3. बहुशास्त्रीयपाठ्यक्रमाः (Multidisciplinary Course)

एषः पाठ्यक्रमसमूहः, छात्रेभ्यः बहुशास्त्रीयं अन्तःशास्त्रीयं वा शिक्षणं दातुमुद्दिष्टः वर्तते। अत्र सामान्यविकल्पपाठ्यपाठ्यक्रमाः (GEs) विविधान्यविषयसमूहात् (स्वचितविषयं विहाय) विषमसमसत्रेषु वर्गीकृत्य प्रदत्ताः भवन्ति।

4. क्षमतावर्धनपाठ्यक्रमाः (क्ष.व.पा. / AEC)

अध्ययनस्य विभिन्नक्षेत्राणां माध्यमेन ज्ञानवर्धनाय उद्दिष्टाः पाठ्यक्रमाः क्षमतावर्धनपाठ्यक्रमाः भवन्ति। भाषा, साहित्यं, पर्यावरणविज्ञानमथ च नैरन्तर्यविकासम् (Sustainable Development) इत्यादयः अत्र अन्तर्भवन्ति। एते क्षमतावर्धनपाठ्यक्रमाः सर्वासामपि अध्ययनशाखानां कृते अनिवार्याः।

5. कौशलवर्धनपाठ्यक्रमाः (कौ.व.पा. / SEC)

एते कौशलवर्धनपाठ्यक्रमाः कौशल-आधारितपाठ्यक्रमाः भवन्ति। एते सर्वासामपि अध्ययनशाखानां कृते अनिवार्याः। छात्राणां कृते प्रशिक्षणं, दक्षतां, प्रावीण्यं, कौशलं च प्रदातुम् एते उद्दिष्टाः।

6. मूल्यवर्धनपाठ्यक्रमाः (मू.व.पा. / VAC)

एषः पाठ्यक्रमसमूहः विभिन्नविषयाणां कृते प्रस्तावितानां पाठ्यक्रमाणां सामान्यसञ्चयः अस्ति। तथा च पाठ्यक्रमेऽस्मिन् नैतिक-सांस्कृतिकमूल्यानां समावेशद्वारा व्यक्तित्वनिर्माणं लक्षितम्। छात्राणां समग्रविकासाय अपेक्षिताः आलोचनात्मकचिन्तनं, भारतीयज्ञानपरम्परा, वैज्ञानिकदृष्टिकोणः, संचारकौशलं, रचनात्मकलेखनं, प्रस्तुतीकरणकौशलं तथा शारीरिकशिक्षा (योगः) इत्यादयः अत्र समाविष्टाः भवन्ति।

NHEQF Level	योग्यतायाः उपाधेः वा नाम/ नामकरणम्	श्रेयोऽङ्क-आवश्यकता
स्तरः 5 (Level 5)	द्वितीयसत्रस्य सफलसमाप्तेः अनन्तरं ये निर्गच्छन्ति तेषां कृते शिक्षणक्षेत्रे/विषयक्षेत्रे स्नातकप्रमाणपत्रस्य (UG Certificate) प्रदानम्। (कार्यक्रमस्य अवधिः - स्नातककार्यक्रमस्य सत्रद्वयम्)	40
स्तरः 6 (Level 6)	चतुर्थसत्रस्य सफलसमाप्तेः अनन्तरं ये निर्गच्छन्ति तेषां कृते शिक्षणक्षेत्रे/विषयक्षेत्रे स्नातकडिप्लोमाप्रमाणपत्रस्य (UG Diploma) प्रदानम्। (कार्यक्रमस्य अवधिः - स्नातककार्यक्रमस्य सत्रचतुष्टयम्)	80
स्तरः 7 (Level 7)	ये एकं विषयं प्रधानपाठ्यक्रमत्वेन स्वीकृत्य षष्ठसत्रस्य सफलसमाप्तेः अनन्तरं निर्गच्छन्ति तेषां कृते स्नातकपदवी-प्रदानम्। (कार्यक्रमस्य अवधिः - सत्रषट्कम्)	120
स्तरः 8 (Level 8)	ये एकं विषयं प्रधानपाठ्यक्रमत्वेन स्वीकृत्य अष्टमसत्रस्य सफलसमाप्तेः अनन्तरं निर्गच्छन्ति तेषां कृते स्नातकप्रतिष्ठा (अनुसन्धानम्) स्नातकप्रतिष्ठा (शैक्षणिकपरियोजना) स्नातकप्रतिष्ठा (शैक्षणिक-उद्यमीकरणम्) इत्युपाधिप्रदानम्। (कार्यक्रमस्य अवधिः – सत्राष्टकम्)	160

राष्ट्रियशिक्षानीतेः अनुसारं स्नातककार्यक्रमस्य प्रस्तावित श्रेयोऽङ्कसंरचना

(Proposed Credit Structure of Undergraduate Programme as per NEP-2020)

	Three Year UG													Four Year UG				
Course Category	Sem 1 Papers	Sem 1 Credit	Sem 2 Papers	Sem 2 Credit	Sem 3 Papers	Sem 3 Credit	Sem 4 Papers	Sem 4 Credit	Sem 5 Papers	Sem 5 Credit	Sem 6 Papers	Sem 6 Credit	Total Credit	Sem 7 Papers	Sem 7 Credit	Sem 8 Papers	Sem 8 Credit	Total Credit
Major	3	12	3	12	3	12	3	12	2	8	1	4	60	3	12	2	8	80
Minor	0	0	0	0	1	4	1	4	2	8	2	8	24	1	4	1	4	32
Multi-disciplinary	0	0	0	0	0	0	1	3	1	3	1	3	9	0	0	0	0	9
SEC	1	2	1	2	1	2	0	0	0	0	1	3	9	0	0	0	0	9
VAC	1	2	1	2	1	2	1	1	1	1	0	0	8	0	0	0	0	8
AEC	1	4	1	4	0	0	0	0	0	0	0	0	8	0	0	0	0	8
Internship												2	2					2
Research Project													0		4		8	12
Total	6	20	6	20	6	20	6	20	6	20	5	20	120	4	20	3	20	160

प्रस्तावितमूल्याकलनरूपरेखा

(Proposed Assessment Framework)

➢ **संस्कृतस्य संस्कृतशास्त्राणाञ्च कार्यक्रमाणां प्रस्तावित मूल्याकलनरूपरेखा एवमस्ति -**

मूल्याकलनम् (Assessment)

(क) सत्रान्तपरीक्षाद्वारा मूल्याङ्कनम् -

1. वैकल्पिकप्रश्नोत्तराणि।
2. एकेन वाक्येन उत्तरलेखनम्।
3. लघूत्तरीयप्रश्नाः।
4. दीर्घोत्तरप्रश्नाः।

(ख) सततमूल्याङ्कनम् -

अधोलिखितेषु कानिचित् चत्वारि आश्रित्य मूल्याङ्कनं विधेयम् -

1. कार्यशालासु भागग्रहणम्।
2. प्रदत्तकार्यलेखनम्।
3. पाठ्यविषयाधारेण चलच्चित्रनिर्माणम्।
4. शास्त्रसंजीवनीकार्यक्रमे भागग्रहणम्।
5. वाग्वर्धिनीसभायाम् अधीतविषयप्रस्तुतिः।

****विशेषः** - उपर्युक्तप्रस्तावितमूल्याकलनरूपरेखायाम् अपेक्षितपरिवर्तनानि योजनानि विषयसम्बद्धं परियोजनाकार्यं/प्रायोगिककार्यं (विषयानुगुणं/स्तरानुगुणं/कक्ष्यानुगुणं) वा विश्वविद्यालयः स्वयं निर्णेतुं शक्नोति। इयं प्रस्तावितमूल्याकलनरूपरेखा दिङ्मात्रं निर्देशं प्रददाति।

प्रस्तावितश्रेयोऽङ्कविभाजनम्
(Proposed Credit Distribution)

➢ **संस्कृतस्य संस्कृतशास्त्राणाञ्च कार्यक्रमाणां प्रस्तावितं श्रेयोऽङ्कविभाजनम् एवमस्ति -**

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
		04	0	0	04

****विशेषसूचना** – एतत् श्रेयोऽङ्कविभाजनं केवलं प्रस्तावितमेव। एतस्मिन् श्रेयोऽङ्कविभाजने विश्वविद्यालयः स्वतः निर्दिष्टश्रेयोऽङ्केषु (व्याख्यान-अनुशिक्षण-प्रशिक्षणादिषु) अपेक्षितपरिवर्तनानि कर्त्तुमर्हति। विश्वविद्यालयः स्वीयमूल्याकलनव्यूहान् आश्रित्यैव निर्णयं स्वीकर्त्तुमर्हति।

****Note:** All the courses are already given with a Proposed Credit Distribution, which is purely proposed in nature. The university may assign credits to tutorials/practical as the case may be and according to their assessment strategies.

प्रथमभागः (Part - I)

(संस्कृतस्य संस्कृतशास्त्राणाञ्च विभिन्नस्नातककार्यक्रमाः)

B.A. Hons.

(Advaita-Vedanta)

अधिगमपरिणाम-आधारितपाठ्यचर्यारूपरेखा

स्नातककार्यक्रमः – अद्वैतवेदान्तः

2025

ज्ञान-विज्ञान विमुक्तये

UGC

विश्वविद्यालय-अनुदान-आयोगः

बहादुरशाह-जफर-मार्गः

नवदेहली – 110002

UGC LOCF Committee (Sanskrit)

Prof. Shrinivasa Varkhedi
Chairperson of the Committee and Vice-Chancellor, Central Sanskrit University, New Delhi – 110058, ✉ vc@csu.co.in
Prof. Sukant Kumar Senapati
Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ sukantsnpt@gmail.com
Prof. Viroopaksha V Jaddipal
Secretary, MSVVP, Ujjain, ✉ vvjaddipal@gmail.com
Dr. M V Natesan
Retd Professor, SSV Kaladi, Kailash Nagar Kolazhy, Biyur, Trichur-10
✉ natesanskt2000@gmail.com
Dr. Mamta Tripathi
Assistant Professor, Gargi College, Delhi, ✉ mamtatripathi.jnu@gmail.com

Curriculum Development Committee for B.A. Hons. (Advaita Vedanta)

Prof. Sukant Kumar Senapati
Chairperson of the committee and Vice-Chancellor, Shri Somnath Sanskrit University, Veraval, ✉ **sukantsnpt@gmail.com**
Dr. Vishwanath Hegde
Assistant Professor, Department of Advaita Vedanta, Central Sanskrit University (CSU), Shringeri, Karnataka, ✉ **dr.vishwanath.hegde@csu.co.in**
Dr. Srinivasa Kumar N Acharya
Convenor of the Committee and Asso. Professor and HoD, Dept. of Philosophy, Manipal Academy of Higher Education, Manipal, Karnataka, ✉ **head.philosophy@manipal.edu**

Co-ordination Committee

Dr. G. Surya Prasad
Chief Co-ordinator of the committee and Asst. Professor, Central Sanskrit University, New Delhi – 110058 ✉ dr.gsurya.prasad@csu.co.in
Dr. Yashvant Kumar Trivedi
Asst. Professor, Central Sanskrit University, New Delhi – 110058
✉ dr.yashvant.trivedi@csu.co.in
Dr. Awasthi Sailesh Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058
✉ dr.awasthisailesh@csu.co.in
Dr. Kishor Kumar
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058
✉ dr.kishor_kumar@csu.co.in
Dr. Deepika Dixit
Asst. Professor Grade, Central Sanskrit University, New Delhi – 110058
✉ dr.deepikadixit@csu.co.in

विषयसूची

कार्यक्रमस्य परिचयः **1**

कार्यक्रमस्य उद्देश्यानि (Objectives of the Program) **3**

कार्यक्रमस्य परिणामाः **4**

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **5**

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम् **10**

अद्वैतवेदान्तस्नातकानां योग्यतासंसूचकानि **12**

प्रधानपाठ्यक्रमाणां सञ्चयः **13**

गौणपाठ्यक्रमाणां सञ्चयः **15**

प्रथमवर्षः (प्रधानपाठ्यक्रमाः) **16**

प्रथमसत्रार्द्धः (SEMESTER – 1) **17**

प्रधानः पाठ्यक्रमः (Major) 1.1: वेदान्तसारः 17

प्रधानः पाठ्यक्रमः (Major) 1.2: वासुदेवमननोक्ताः वेदान्तप्रमेयाः 19

प्रधानः पाठ्यक्रमः (Major) 1.3: अद्वैतवेदान्तदर्शनेतिहासः 21

प्रधानः पाठ्यक्रमः (Major) 1.4: पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः, पञ्चभूतविवेकः नाटकदीपश्च 23

प्रधानः पाठ्यक्रमः (Major) 1.5: श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः . 26

द्वितीयसत्रार्द्धः (SEMESTER – 2) **28**

प्रधानः पाठ्यक्रमः (Major) 1.6: पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः, द्वैतविवेकः, महावाक्यविवेक, कूटस्थदीपश्च 28

प्रधानः पाठ्यक्रमः (Major) 1.7: श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभागयोगश्च 31

प्रधानः पाठ्यक्रमः (Major) 1.8: श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः, श्रद्धात्रयविभागः, मोक्षसंन्यासयोगश्च 34

प्रधानः पाठ्यक्रमः (Major) 1.9: ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि 37

प्रधानः पाठ्यक्रमः (Major) 1.10: कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - १ 39

द्वितीयवर्षः (प्रधानपाठ्यक्रमाः) **41**

तृतीयसत्रार्द्धः (SEMESTER – 3) **42**

प्रधानः पाठ्यक्रमः (Major) 2.1: कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - २ 42

प्रधानः पाठ्यक्रमः (Major) 2.2: केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम् 45
प्रधानः पाठ्यक्रमः (Major) 2.3: तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् - १ 47
प्रधानः पाठ्यक्रमः (Major) 2.4: तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् - २ 49
प्रधानः पाठ्यक्रमः (Major) 2.5: प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च 52
चतुर्थसत्रार्द्धः (SEMESTER – 4) 54
प्रधानः पाठ्यक्रमः (Major) 2.6: विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः 54
प्रधानः पाठ्यक्रमः (Major) 2.7: आत्मबोधः 56
प्रधानः पाठ्यक्रमः (Major) 2.8: अपरोक्षानुभूतिः.....58
प्रधानः पाठ्यक्रमः (Major) 2.9: श्रीदक्षिणामूर्तिस्तोत्रस्य मानसोल्लासव्याख्यानस्थाः विचाराः 61
प्रधानः पाठ्यक्रमः (Major) 2.10: वाक्यवृत्तिस्थविचाराः 64
तृतीयवर्षः (प्रधानपाठ्यक्रमाः) 66
पञ्चमसत्रार्द्धः (SEMESTER – 5) 67
प्रधानः पाठ्यक्रमः (Major) 3.1: नैष्कर्म्यसिद्धौ प्रतिपादिताः वेदान्तविचाराः 67
प्रधानः पाठ्यक्रमः (Major) 3.2: वेदान्तपरिभाषायां प्रतिपादितानि प्रत्यक्षानुमानोपमानशब्दप्रमाणानि **.....69**
प्रधानः पाठ्यक्रमः (Major) 3.3: वेदान्तपरिभाषायां प्रतिपादिताः अर्थापत्ति-अनुपलब्धि-विषय-प्रयोजनविचाराः **..72**
प्रधानः पाठ्यक्रमः (Major) 3.4: ब्रह्मसूत्रशाङ्करभाष्यानुसारं चतुस्सूत्र्यां प्रतिपादितानि वेदान्ततत्त्वानि **.....75**
प्रधानः पाठ्यक्रमः (Major) 3.5: ब्रह्मसूत्रशाङ्करभाष्यम्-२ प्रथमाध्याये प्रथमपादे पञ्चमाधिकरणादारभ्य द्वितीयपादान्तस्थविचाराः 77
षष्ठसत्रार्द्धः (SEMESTER – 6).....79
प्रधानः पाठ्यक्रमः (Major) 3.6: छान्दोग्योपनिषदः षष्ठाध्याये वर्णितः ब्रह्मात्मैक्यविचारः 79
प्रधानः पाठ्यक्रमः (Major) 3.7: माण्डूक्यकारिकास्थ-अवस्थात्रयनिरूपणम्.....81
प्रधानः पाठ्यक्रमः (Major) 3.8: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - १.....83
प्रधानः पाठ्यक्रमः (Major) 3.9: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - २.....85
प्रधानः पाठ्यक्रमः (Major) 3.10: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - ३.....87
चतुर्थवर्षः (प्रधानपाठ्यक्रमाः) 90
सप्तमसत्रार्द्धः (SEMESTER - 7) 91
प्रधानः पाठ्यक्रमः (Major) 4.1: मुण्डकोपनिषदि प्रतिपादितानि दार्शनिकतत्त्वानि.....91
प्रधानः पाठ्यक्रमः (Major) 4.2: ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्याये प्रथमद्वितीयपादयोः वर्णिताः विचाराः.....93

प्रधानः पाठ्यक्रमः (Major) 4.3: तत्त्वप्रदीपिकाख्ये वादग्रन्थे प्रतिपादिताः स्वप्रकाशत्वादिविचाराः 95

प्रधानः पाठ्यक्रमः (Major) 4.4: अध्यास-जिज्ञासाधिकरणयोः भामतीदिशा विचारः 97

प्रधानः पाठ्यक्रमः (Major) 4.5: दशश्लोक्यां प्रतिपादितानां विचाराणां सिद्धान्तबिन्दुदिशा अध्ययनम्.....99

अष्टमसत्रार्द्धः (SEMESTER – 8) 102

प्रधानः पाठ्यक्रमः (Major) 4.6: द्युभ्वाद्यधिकरणादारभ्य सर्वव्याख्यानाधिकरणान्ताः विचाराः 102

प्रधानः पाठ्यक्रमः (Major) 4.7: वियदधिकरणादारभ्य सञ्ज्ञामूर्तिक्लृप्त्यधिकरणान्ताः विचाराः 105

प्रधानः पाठ्यक्रमः (Major) 4.8: अद्वैतसिद्धिः (आदितः मिथ्यात्वमिथ्यात्वपर्यन्तम्) 107

प्रधानः पाठ्यक्रमः (Major) 4.9: भामत्यनुसारं द्वितीय-तृतीय-चतुर्थाधिकरणविचाराः.....110

प्रधानः पाठ्यक्रमः (Major) 4.10: दृश्यत्वोपपत्तिम् आरभ्य सोपाधिकत्वनिरासपर्यन्तविचाराः.....112

प्रथमवर्षः (गौणपाठ्यक्रमाः) 115

गौणः पाठ्यक्रमः (Minor) 1.क.1: वेदान्तसारः.....116

गौणः पाठ्यक्रमः (Minor) 1.क.2: वासुदेवमननोक्ताः वेदान्तप्रमेयाः 118

गौणः पाठ्यक्रमः (Minor) 1.क.3: अद्वैतवेदान्तदर्शनेतिहासः.....120

द्वितीयवर्षः (गौणपाठ्यक्रमाः).....122

गौणः पाठ्यक्रमः (Minor) 2.क.1: पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः, पञ्चभूतविवेकः, नाटकदीपश्च 123

गौणः पाठ्यक्रमः (Minor) 2.क.2: श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः126

गौणः पाठ्यक्रमः (Minor) 2.क.3: पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः, द्वैतविवेकः, महावाक्यविवेक, कूटस्थदीपश्च 128

तृतीयवर्षः (गौणपाठ्यक्रमाः).....131

गौणः पाठ्यक्रमः (Minor) 3.क.1: श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभागयोगश्च 132

गौणः पाठ्यक्रमः (Minor) 3.क.2: श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः, श्रद्धात्रयविभागः, मोक्षसंन्यासयोगश्च 135

गौणः पाठ्यक्रमः (Minor) 3.क.3: ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि.....138

चतुर्थवर्षः (गौणपाठ्यक्रमाः) 140

गौणः पाठ्यक्रमः (Minor) 4.क.1: केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम् 141

गौणः पाठ्यक्रमः (Minor) 4.क.2: प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च.....143

गौणः पाठ्यक्रमः (Minor) 4.क.3: विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः 145

गौणः पाठ्यक्रमः (Minor) 4.क.4: आत्मबोधः 147
गौणः पाठ्यक्रमः (Minor) 4.क.5: अपरोक्षानुभूतिः 149

कार्यक्रमस्य परिचयः

(Introduction of the Program)

अस्य कार्यक्रमस्य उद्देश्यं तावत् नवीनदृष्टिकोणयुक्तानां छात्राणां सर्वेषाम् अद्वैतवेदान्तस्य स्नातकपाठ्यक्रमेषु उन्मुखीकरणम् अस्ति। अयं पाठ्यक्रमः Learning Outcome-based Curriculum Framework **(LOCF)** इत्यस्य आधारेण निरूपितःअस्ति, यः विविधविश्वविद्यालयेषु अनुसर्तुं योग्यः वर्तते ।

LOCF - पद्धतिः स्नातकस्तरे लक्ष्यकेन्द्रितस्य पाठ्यक्रमस्य प्रस्तुतये उपकरोति। इयं पद्धतिः "छात्रकेन्द्रितायाःशिक्षण-अधिगमप्रक्रियायाः आविष्करणे अत्युपयुक्ता भवति इति अभिप्रायेण निरूपिता अस्ति। एषा पद्धतिः छात्राणाम् अधिगमानुभवे स्पष्टतां दार्ढ्यं च समुत्पादयति। अनया पद्धत्या छात्राः यथेच्छं स्वीयपाठ्यक्रमे संलग्नाः भवन्ति । ईदृशः स्नातकपाठ्यक्रमः छात्राणां न केवलं द्वैतवेदान्तविषये शिक्षणं प्रददाति अपितु व्यक्तित्वविकसनेन सह उपजीविकां कल्पयति।

LOCF - पद्धतिः पाठ्यक्रमस्य स्वभावं स्वरूपं वाविस्तरेण वर्णयति अपि च पाठ्यक्रमस्य अध्ययनाद् यानि यानि फलानि प्राप्यन्ते, तान् अपि सूचयति। अनया पद्धत्या स्नातकस्तरपाठ्यक्रमात् व्यज्यमानाः गुणाः निर्दिश्यन्ते। एते गुणाः स्वास्थ्यम्, भावनात्मकसंतुलनम्, समालोचनात्मकचिन्तनम्, सामाजिकन्यायः च एवं औद्योगिककौशलानि भवन्ति। अयं कार्यक्रमः छात्रेषु निरन्तराध्ययनयोग्यतां, स्थिरजीवनं च जनयति। भारतीयदर्शनाध्ययनविषये दृष्टिकोणं च परिवर्तयति।

बी.ए. अद्वैतवेदान्तः (प्रतिष्ठापाठ्यक्रमः) इत्यस्मिन् पाठ्यक्रमे विविधदर्शनान्याश्रित्य समीक्षात्मकानि, विमर्शात्मकानि, विविष्टचिन्तनपराणि लेखनानि रचयितुं स्रोतः समुपलभ्यते। अयं पाठ्यक्रमः अंतर्विषयात्मकपद्धतिम् अनुसरति यया छात्राः अद्वैतवेदान्तक्षेत्रस्य संक्षिप्तं, गूढं च परिचयं प्राप्नुवन्ति, ये च अन्यान्विषयान् अपि पठन्ति, तेषु विषयेषु अपि विशिष्टां जिज्ञासां प्राप्नुवन्ति। अयं पाठ्यक्रमः मानवजीवनकौशलेन, सामाजिकविज्ञानेन, अध्यात्मविज्ञानेन च सह सम्बन्धं स्थापयति। अनेन पाठ्यक्रमेण छात्राः भारतीयदर्शनानां विश्लेषणे समस्या-समाधानयोरधिगमने च सामर्थ्यं सम्पादयन्ति।

एषः पाठ्यक्रमः छात्रेषु सर्वोत्तमं बौद्धिकसामर्थ्यं जनयितुं रचितः अस्ति। येन छात्रः व्यक्तित्वविकासं सामाजिक जीवनविकासं च आसादयितुं समर्थः भवेत्।

अयं पाठ्यक्रमः भारतीयदर्शनाध्ययनस्य सामान्यरूपेण प्रचलितान् दृष्टिकोणान् आविष्कर्तुम् अन्यथाधारणां च अपाकर्तुं तद्द्वारा अद्वैतदर्शनाध्ययने छात्राणां रुचिं च जनयितुं संरचितः वर्तते। अयं कार्यक्रमः छात्राणाम् अधिकतमां मनोनुकूलतां (Flexibility) कल्पयितुम् आयोज्यते।

अत्र मुख्यविषयान्तर्गतानि चत्वारिंशद् (Core Disciplinary Papers) 40 पत्राणि सन्ति, यानि अद्वैतवेदान्तविषये मूलभूतं ज्ञानं, समीक्षात्मकं तार्किकं च चिन्तनं, तुलनात्मकं ज्ञानं विमर्शात्मकं विवेचनात्मकम् अध्ययनं च यथावत्प्रयच्छन्ति ।

अयं पाठ्यक्रमः एवमपि दृष्टिगतं स्यात्, यत् छात्राः स्वस्वरुच्यानुसारं शिक्षां स्वयमेव समनुनयन्तु इति निमित्तेन अनेकविकल्पान् प्रदातुं नियोजितः अस्ति इति।

पाठ्यक्रमोऽयं न केवलं प्राचीनदर्शनेषु अपितु पाश्चात्य-आधुनिकदर्शनेषु च ज्ञानं कौशलं च संवर्धयति। अन्येषु विषयेषु अपि आवश्यकानि कौशलानि संवर्धयति। बी.ए. अद्वैतवेदान्तपाठ्यक्रमः अंतश्शास्त्रीयः बहुशास्त्रीयश्च अस्ति। यः विविधदर्शनेषु विशेषज्ञानं प्राप्तुं सहायकः अस्ति। यश्च अन्यविषयाणां सम्बद्धकौशलानां प्राप्त्युपायः भवति। एतस्य पाठ्यक्रमस्य मुख्यविषयाः (Core), अन्तश्शास्त्रीयबहुशास्त्रीय-विषयविशेषवैकल्पिकपत्राणां (Interdisciplinary Multidisciplinary Electives), कौशलवर्धनपाठ्यानां (Skill Enhancement Courses) च सम्यक्संयोजनम् आवहति। अनेन भारतीयदर्शनेषु अध्ययनं कुर्वन् छात्रः तदितरसंबद्धविषयेभ्यः अपि यथायोग्यं ज्ञानं लभते।

स्वरूपं विस्तृतिः च (Nature And Scope)

बी.ए. अद्वैतवेदान्तपाठ्यक्रमः त्रिवर्षीयः/चतुर्वर्षीयः अस्ति। प्रतिवर्षं द्वे द्वौ सत्रौ भवतः। अतः सम्पूर्णपाठ्यक्रमे षट्/अष्टौ सत्राणि भवन्ति। प्रति सत्रं षोडशसप्ताहपर्यन्तः अध्ययनाध्यापनमूल्याङ्कनकालः निश्चितो भवति। अस्मिन्पाठ्यक्रमे अध्यापनं च अध्ययनं च सैद्धान्तिककक्षाभिः (Lecture व्याख्यानरूपेण) तथा प्रशिक्षणकक्षाभिः **(Tutorial)** सह सम्पन्नं भवति। पाठ्यक्रमः औपचारिकव्याख्यानैः सह अध्याप्यते, यत्र Powerpoint प्रस्तुतीनां, Audio-Video उपकरणानां च उपयोगः करणीयः। यथायोग्यमवसरः प्राप्तः चेत् अन्यानिशिक्षणसाधनानि अपि प्रयोक्तुं शक्यन्ते।

केषुचित्पाठ्येषु अतिरिक्तानि अपेक्ष्यानि भवन्ति, यथा – वृत्तचित्रदर्शनम् (Documentary), चलनचित्रदर्शनम्, क्षेत्रकार्यं (Field Work), अभिलेखसंग्रहणम् (Archival Work), विविधविदुषां/संस्थानां दर्शनम् (Interaction with Scholars and Visit to Gurukula), परियोजनायाः कार्यम् (Project Work) इत्यादीनि। एतानि नियमिताध्यापनसहितं सम्यक्समायोज्यन्ते।

कार्यक्रमस्य उद्देश्यानि
(Objectives of the Program)

अस्य पाठ्यक्रमस्य उद्देश्यम् एवं प्रकारेण निर्दिष्टं भवति -

1. छात्रेभ्यः भारतीयदार्शनिकपरम्परायाः ज्ञानस्य प्रदानम्।
2. एतत् ज्ञानं समाजस्य श्रेयसि कथम् उपयोगी भवति, इति शिक्षणम्।
3. दार्शनिकाः कथम् अनुसन्धानम् अकुर्वन्, अधुना कुर्वन्ति, कथं तर्कमाश्रित्य तथ्येषु सत्यासत्यविवेचनं कुर्वन्तीति ज्ञानप्रापणम्।
4. प्राचीनज्ञानपरम्परायाः अध्ययनात् अधुनातनजीवनस्य निर्माणम्।
5. अतीतवर्तमानयोः ज्ञानकर्मणोः परस्परंसम्बद्धतायाः ज्ञानप्रदानम्।
6. छात्राणां चिन्तनकौशल-जीवनकौशल-विश्लेषणशक्ति-तार्किकचिन्तनानां वर्धनम्।
7. अनुसन्धानाभिमुखदृष्टेः प्रदानम्।
8. जगत्-जीवविषययोः शोधकार्यकरणे स्वानुभवे तस्य आअनयने च प्रेरणादानम्।
9. दृष्टेः अन्तमुखत्वसम्पादनद्वारा परमसत्यस्य अन्वेषणमार्गे गन्तुं प्रेरणादानम्।
10. समष्टिबुद्ध्या जगतः हित्तचिन्तनकरणस्य सामर्थ्यस्य आधानम्।

कार्यक्रमस्य परिणामाः
(Outcomes of the Program)

अस्मिन् पाठ्यक्रमे पञ्जीकृताः छात्राः अत्यावश्यककौशलानां सामर्थ्यानां च पूर्णतया सङ्ग्रहणे प्रशिक्ष्यन्ते। एतानि अधोलिखितलक्ष्याणि संसाधयितुम् अवसरं लप्स्यन्ते -

कार्यक्रमस्य परिणामः – 1	विशिष्टकाले, विशिष्टप्रदेशे आविष्कृतानां दार्शनिकतत्त्वानाम् मूलरूपेण अध्ययनम्।
कार्यक्रमस्य परिणामः – 2	विशिष्टसन्दर्भेषु देशविशेषे च समुत्पन्नानां दर्शनानां ज्ञानं व्यवस्थितरूपेण दार्शनिकतत्त्वानामधिगमनम्, प्रस्तुतीकरणम्, देश-काल-संस्कृत्याद्याधारेण तत्त्वानां तथ्यानाञ्च सूक्ष्मतया तुलनां कर्तुं प्रेरणा।
कार्यक्रमस्य परिणामः – 3	अद्वैतदर्शने उन्नताध्ययनाय ग्रन्थसूचीसंसाधनानां (Bibliographical Tools) उपयोगक्षमता।
कार्यक्रमस्य परिणामः – 4	भिन्नभिन्नानां दार्शनिकविचारधाराणां, तर्कविन्यासानां, दृष्टिकोणानां च सम्यक् ज्ञानं परीक्षणञ्च।
कार्यक्रमस्य परिणामः – 5	विभिन्नदार्शनिकतत्त्वानां परिशीलनं तद्द्वारा दार्शनिकेषु तत्प्रकाशिततत्त्वेषु च गौरवबुद्धेः विकासः।
कार्यक्रमस्य परिणामः – 6	प्रत्यक्षादिप्रमाणानां व्यवस्था, जीव-ब्रह्म-प्रकृति-प्रपञ्चादिवस्तूनां विशिष्टाध्ययने प्रमाणानां स्थानं स्वरूपञ्च ज्ञातुं अपेक्षितस्य विशिष्टकौशलस्य विकासः।

प्रधानानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

PROGRAM OUTCOME MAPPING FOR MAJOR COURSES

Course Name पाठ्यक्रमनाम	Rootedness भारतीयमूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level काठिन्यस्तरः
वेदान्तसारः	✓	✓	✓	✓	✓	✓	✓
वासुदेवमननोक्ताः वेदान्तप्रमेयाः	✓	✓	✓	✓	✓	✓	✓
अद्वैतवेदान्तदर्शनेतिहासः	✓	✓	✓	✓	✓	✓	✓
पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः पञ्चभूतविवेकः नाटकदीपश्च	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः	✓	✓	✓	✓	✓	✓	✓
पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः द्वैतविवेकः महावाक्यविवेकः कूटस्थदीपश्च	✓	✓	✓	✓	✓	✓	✓

श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभागयोगश्च	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः श्रद्धात्रयविभागः मोक्षसंन्यासयोगश्च	✓	✓	✓	✓	✓	✓	✓
ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि	✓	✓	✓	✓	✓	✓	✓
कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - १	✓	✓	✓	✓	✓	✓	✓
कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - २	✓	✓	✓	✓	✓	✓	✓
केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम्	✓	✓	✓	✓	✓	✓	✓
तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् - १	✓	✓	✓	✓	✓	✓	✓
तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् - २	✓	✓	✓	✓	✓	✓	✓
प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च	✓	✓	✓	✓	✓	✓	✓
विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः	✓	✓	✓	✓	✓	✓	✓
आत्मबोधः	✓	✓	✓	✓	✓	✓	✓
अपरोक्षानुभूतिः	✓	✓	✓	✓	✓	✓	✓

श्रीदक्षिणामूर्तिस्तोत्रस्य मानसोल्लासव्याख्यान-स्थाः विचाराः	✓	✓	✓	✓	✓	✓	✓
वाक्यवृत्तिस्थविचाराः	✓	✓	✓	✓	✓	✓	✓
नैष्कर्म्यसिद्धौ प्रतिपादिताः वेदान्तविचाराः	✓	✓	✓	✓	✓	✓	✓
वेदान्तपरिभाषायां प्रतिपादितानि प्रत्यक्षानुमानोपमानशब्द-प्रमाणानि	✓	✓	✓	✓	✓	✓	✓
वेदान्तपरिभाषायां प्रतिपादिताः अर्थापत्ति-अनुपलब्धि-विषय-प्रयोजनविचाराः	✓	✓	✓	✓	✓	✓	✓
ब्रह्मसूत्रशाङ्करभाष्यानु-सारं चतुस्सूत्र्यां प्रतिपादितानि वेदान्ततत्त्वानि	✓	✓	✓	✓	✓	✓	✓
ब्रह्मसूत्रशाङ्करभाष्यम्-२ प्रथमाध्याये प्रथमपादे पञ्चमाधिकरणादारभ्य द्वितीयपादान्तस्थविचाराः	✓	✓	✓	✓	✓	✓	✓
छान्दोग्योपनिषदः षष्ठाध्याये वर्णितः ब्रह्मात्मैक्यविचारः	✓	✓	✓	✓	✓	✓	✓
माण्डूक्यकारिकास्थ-अवस्थात्रयनिरूपणम्	✓	✓	✓	✓	✓	✓	✓
सिद्धान्तलेशसंग्रहे निरूपिताः	✓	✓	✓	✓	✓	✓	✓

वेदान्तप्रक्रियाविशेषाः - १							
सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - २	✓	✓	✓	✓	✓	✓	✓
सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - ३	✓	✓	✓	✓	✓	✓	✓
मुण्डकोपनिषदि प्रतिपादितानि दार्शनिकतत्त्वानि	✓	✓	✓	✓	✓	✓	✓
ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्याये प्रथमद्वितीयपादयोः वर्णिताः विचाराः	✓	✓	✓	✓	✓	✓	✓
तत्त्वप्रदीपिकाख्ये वादग्रन्थे प्रतिपादिताः स्वप्रकाशत्वादिविचाराः	✓	✓	✓	✓	✓	✓	✓
अध्यास-जिज्ञासाधिकरणयोः भामतीदिशा विचारः	✓	✓	✓	✓	✓	✓	✓
दशश्लोक्यां प्रतिपादितानां विचाराणां सिद्धान्तबिन्दुदिशा अध्ययनम्	✓	✓	✓	✓	✓	✓	✓
द्युभ्वाद्यधिकरणादारभ्य सर्वव्याख्यानाधि-करणान्ताः विचाराः	✓	✓	✓	✓	✓	✓	✓

वियदधिकरणादारभ्य संज्ञामूर्तिक्लृप्त्यधि-करणान्ताः विचाराः	✓	✓	✓	✓	✓	✓	✓
अद्वैतसिद्धिः (आदितः मिथ्यात्वमिथ्यात्व-पर्यन्तम्)	✓	✓	✓	✓	✓	✓	✓
भामत्यनुसारं द्वितीय-तृतीय-चतुर्थाधिकरणविचाराः	✓	✓	✓	✓	✓	✓	✓
दृश्यत्वोपपत्तिम् आरभ्य सोपाधिकत्वनिरासपर्यन्त विचाराः	✓	✓	✓	✓	✓	✓	✓

गौणानां पाठ्यक्रमाणां कार्यक्रमपरिणामैः सह योजनम्

(PROGRAM OUTCOME MAPPING FOR MINOR COURSES)

Course Name पाठ्यक्रमनाम	Rootedness भारतीय मूलानि	IKS भारतीय ज्ञान परम्परा	Futuristic भविष्यवादी	Employability वृत्तिप्रदानक्षमता	Value, Skill and Multidisciplinary मूल्यानि, कौशलानि एवं बहुशास्त्रीयपाठ्यक्रमः	Disciplinary Knowledge अध्ययनशाखायाः ज्ञानम्	Difficulty Level कठिनतायाः स्तरः
वेदान्तसारः	✓	✓	✓	✓	✓	✓	✓
वासुदेवमननोक्ताः वेदान्तप्रमेयाः	✓	✓	✓	✓	✓	✓	✓
अद्वैतवेदान्तदर्शने-तिहासः	✓	✓	✓	✓	✓	✓	✓
पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः पञ्चभूतविवेकः नाटकदीपश्च	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः	✓	✓	✓	✓	✓	✓	✓
पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः द्वैतविवेकः महावाक्यविवेकः कूटस्थदीपश्च	✓	✓	✓	✓	✓	✓	✓

श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभाग-योगश्च	✓	✓	✓	✓	✓	✓	✓
श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः श्रद्धात्रयविभागः मोक्षसंन्यासयोगश्च	✓	✓	✓	✓	✓	✓	✓
ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि	✓	✓	✓	✓	✓	✓	✓
केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम्	✓	✓	✓	✓	✓	✓	✓
प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च	✓	✓	✓	✓	✓	✓	✓
विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः	✓	✓	✓	✓	✓	✓	✓
आत्मबोधः	✓	✓	✓	✓	✓	✓	✓
अपरोक्षानुभूतिः	✓	✓	✓	✓	✓	✓	✓

अद्वैतवेदान्तस्नातकानां योग्यतासंसूचकानि

(QUALIFICATION DESCRIPTORS FOR ADWAIT VEDANTA GRADUATES)

संस्कृतं किञ्चन क्षेत्रं भवति यत्र वयं सामाजिक-राजनैतिक-न्याय-नैतिकादीनां विभिन्नानां विश्वं प्रभावयतां पक्षाणाम् अध्ययनं कर्तुं प्रवृत्ताः भवेम। तदर्थं बी.ए. ऑनर्स् (अद्वैतवेदान्तः) पाठ्यक्रमाय अधोदत्तानि योग्यतासंसूचकानि स्वीकृतानि -

- संस्कृतस्य संस्कृतशास्त्राणाञ्च गहनतया अवबोधस्य प्रदर्शनम्।
- सरलमानकसंस्कृतेन समृद्धप्राचीनप्रज्ञावबोधाय ज्ञानस्य अनुप्रयोगः।
- भारतीयज्ञानपरम्परायाः (IKS) समकालीनज्ञानपरम्पराणां च विस्तृतज्ञानस्य प्रदर्शनम्।
- अर्थशास्त्र-राजनीति-न्याय-गणित-भौतिक-रसायन-विज्ञानादिविषयज्ञानोपेतस्य संस्कृतस्य बहुशास्त्रियोपागमत्त्वेन प्रदर्शनम्।
- समकालीनविषयाणां व्यापकं ज्ञानं, चितक्षेत्रसम्बद्धः वैदुष्यपूर्णशोधः, समकालीनविषयावगमनाय आवश्यककौशलानां प्रविधीनां च प्रदर्शनम्।

प्रधानपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 1.1: वेदान्तसारः	4	100-199
2		प्रधानः 1.2: वासुदेवमननोक्ताः वेदान्तप्रमेयाः	4	100-199
3		प्रधानः 1.3: अद्वैतवेदान्तदर्शनेतिहासः	4	100-199
4		प्रधानः 1.4: पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः पञ्चभूतविवेकः नाटकदीपश्च	4	100-199
5		प्रधानः 1.5: श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः	4	100-199
6		प्रधानः 1.6: पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः द्वैतविवेकः महावाक्यविवेकः कूटस्थदीपश्च	4	100-199
7		प्रधानः 1.7: श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभागयोगश्च	4	100-199
8		प्रधानः 1.8: श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः श्रद्धात्रयविभागः मोक्षसंन्यासयोगश्च	4	100-199
9		प्रधानः 1.9: ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि	4	100-199
10		प्रधानः 1.10: कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - १	4	100-199
11	द्वितीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 2.1: कठोपनिषदि प्रतिपादितं वेदान्ततत्त्वम् - २	4	200-299
12		प्रधानः 2.2: केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम्	4	200-299
13		प्रधानः 2.3: तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् -१	4	200-299
14		प्रधानः 2.4: तैत्तिरीयोपनिषन्मन्त्राणां भाष्याध्ययनम् - २	4	200-299
15		प्रधानः 2.5: प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च	4	200-299
16		प्रधानः 2.6: विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः	4	200-299
17		प्रधानः 2.7: आत्मबोधः	4	200-299
18		प्रधानः 2.8: अपरोक्षानुभूतिः	4	200-299
19		प्रधानः 2.9: श्रीदक्षिणामूर्तिस्तोत्रस्य मानसोल्लासव्याख्यानस्थाः विचाराः	4	200-299
20		प्रधानः 2.10: वाक्यवृत्तिस्थविचाराः	4	200-299
21	तृतीयवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 3.1: नैष्कर्म्यसिद्धौ प्रतिपादिताः वेदान्तविचाराः	4	300-399
22		प्रधानः 3.2: वेदान्तपरिभाषायां प्रतिपादितानि प्रत्यक्षानुमानोपमानशब्दप्रमाणानि	4	300-399

23		प्रधानः 3.3: वेदान्तपरिभाषायां प्रतिपादिताः अर्थापत्ति-अनुपलब्धि-विषय-प्रयोजनविचाराः	4	300-399
24		प्रधानः 3.4: ब्रह्मसूत्रशाङ्करभाष्यानुसारं चतुस्सूत्र्यां प्रतिपादितानि वेदान्ततत्त्वानि	4	300-399
25		प्रधानः 3.5: ब्रह्मसूत्रशाङ्करभाष्यम्-२ प्रथमाध्याये प्रथमपादे पञ्चमाधिकरणादारभ्य द्वितीयपादान्तस्थविचाराः	4	300-399
26		प्रधानः 3.6: छान्दोग्योपनिषदः षष्ठाध्याये वर्णितः ब्रह्मात्मैक्यविचारः	4	300-399
27		प्रधानः 3.7: माण्डूक्यकारिकास्थ-अवस्थात्रयनिरूपणम्	4	300-399
28		प्रधानः 3.8: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - १	4	300-399
29		प्रधानः 3.9: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - २	4	300-399
30		प्रधानः 3.10: सिद्धान्तलेशसंग्रहे निरूपिताः वेदान्तप्रक्रियाविशेषाः - ३	4	300-399
31	चतुर्थवर्षीयाः प्रधानपाठ्यक्रमाः	प्रधानः 4.1: मुण्डकोपनिषदि प्रतिपादितानि दार्शनिकतत्त्वानि	4	400-499
32		प्रधानः 4.2: ब्रह्मसूत्रशाङ्करभाष्ये द्वितीयाध्याये प्रथमद्वितीयपादयोः वर्णिताः विचाराः	4	400-499
33		प्रधानः 4.3: तत्त्वप्रदीपिकाख्ये वादग्रन्थे प्रतिपादिताः स्वप्रकाशत्वादिविचाराः	4	400-499
34		प्रधानः 4.4: अध्यास-जिज्ञासाधिकरणयोः भामतीदिशा विचारः	4	400-499
35		प्रधानः 4.5: दशश्लोक्यां प्रतिपादितानां विचाराणां सिद्धान्तबिन्दुदिशा अध्ययनम्	4	400-499
36		प्रधानः 4.6: द्युभ्वाद्यधिकरणादारभ्य सर्वव्याख्यानाधिकरणान्ताः विचाराः	4	400-499
37		प्रधानः 4.7: वियदधिकरणादारभ्य संज्ञामूर्तिक्लृप्त्यधिकरणान्ताः विचाराः	4	400-499
38		प्रधानः 4.8: अद्वैतसिद्धिः (आदितः मिथ्यात्वमिथ्यात्वपर्यन्तम्)	4	400-499
39		प्रधानः 4.9: भामत्यनुसारं द्वितीय-तृतीय-चतुर्थाधिकरणविचाराः	4	400-499
40		प्रधानः 4.10: दृश्यत्वोपपत्तिम् आरभ्य सोपाधिकत्वनिरासपर्यन्तविचाराः	4	400-499

गौणपाठ्यक्रमाणां सञ्चयः

क्र.सं.		पाठ्यक्रमः	पाठ्यक्रम-श्रेयोऽङ्कः	पाठ्यक्रम-काठिन्यस्तरः
1	प्रथमवर्षीयाः गौणपाठ्यकमाः	गौणः 1.क.1: वेदान्तसारः	4	100-199
2		गौणः 1.क.2: वासुदेवमननोक्ताः वेदान्तप्रमेयाः	4	100-199
3		गौणः 1.क.3: अद्वैतवेदान्तदर्शनेतिहासः	4	100-199
4	द्वितीयवर्षीयाः गौणपाठ्यकमाः	गौणः 2.क.1: पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः पञ्चभूतविवेकः नाटकदीपश्च	4	200-299
5		गौणः 2.क.2: श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः	4	200-299
6		गौणः 2.क.3: पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः द्वैतविवेकः महावाक्यविवेकः कूटस्थदीपश्च	4	200-299
7	तृतीयवर्षीयाः गौणपाठ्यक्रमाः	गौणः 3.क.1: श्रीमद्भगवद्गीतायां प्रतिपादितः भक्तियोगः, गुणत्रयविभागयोगः, पुरुषोत्तमयोगः, द्वैवासुरसम्पद्विभागयोगश्च	4	300-399
8		गौणः 3.क.2: श्रीमद्भगवद्गीतायां प्रतिपादितः क्षेत्रक्षेत्रज्ञविभागः श्रद्धात्रयविभागः मोक्षसंन्यासयोगश्च	4	300-399
9		गौणः 3.क.3: ईशावास्योपनिषदि प्रातिपादितानि वेदान्ततत्त्वानि	4	300-399
10	चतुर्थवर्षीयाः गौणपाठ्यक्रमाः	गौणः 4.क.1: केनोपनिषदि प्रतिपादितं दार्शनिकतत्त्वम्	4	400-499
11		गौणः 4.क.2: प्रश्नोपनिषदि पृष्टाः प्रश्नाः समाधानानि च	4	400-499
12		गौणः 4.क.3: विवेकचूडामणौ प्रतिपादिताः विशिष्टाः विचाराः	4	400-499
13		गौणः 4.क.4: आत्मबोधः	4	400-499
14		गौणः 4.क.5: अपरोक्षानुभूतिः	4	400-499

प्रथमवर्षः

(प्रधानपाठ्यक्रमाः)

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रथमसत्रार्द्धः (SEMESTER – 1)

प्रधानः पाठ्यक्रमः (Major) 1.1: वेदान्तसारः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदान्तसारस्य कर्तुः सदानन्दयोगीन्द्रस्य परिचयः।
2. वेदान्तसारे वर्णितानां वेदान्तविषयाणाम् अवबोधनम्।
3. अद्वैतवेदान्तशास्त्रे प्रयुक्तानां पारिभाषिकशब्दानां सार्थं ज्ञानसम्पादनम्।
4. महावाक्यार्थज्ञाने प्रवेशप्राप्तिः।
5. वेदान्तरीत्या योगाङ्गानां परिचयप्राप्तिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वेदान्तदर्शनस्य सामान्यज्ञानं प्राप्स्यन्ति।
2. गुरोः समीपं कथं गन्तव्यं तथा गुरुः कथम् उपदिशति इति विषये ज्ञानं अवाप्स्यन्ति।
3. अनुबन्धचतुष्टयस्य विशेषज्ञानमवाप्स्यन्ति।
4. उपादानं, विवर्तः, परिणाम इत्यादिनां भेदं ज्ञास्यन्ति।
5. अध्यारोप-अपवादयोः बोधं प्राप्य तन्न्यायसञ्चारणे कुशलिनो भविष्यन्ति।
6. अज्ञानस्य शक्तिद्वयं, तत्कार्यम्, अवस्थात्रयं, कोशपञ्चकम् इत्यादिविषयाणां परिचयं प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.1	वेदान्तसारः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- अद्वैतरीत्या वेदान्तशब्दार्थः।
- अनुबन्धचतुष्टयम्।
- गुरूपसदनम्।
- अध्यारोपः।
- अज्ञानस्य समष्टिव्यष्टिरूपत्वम्।
- तुरीयचैतन्यम्।

अन्वितिः २. **श्रेयोऽङ्कः १**

- अज्ञानस्य शक्तिद्वयम्।

- सृष्टिक्रमः।
- सूक्ष्मशरीरोत्पत्तिः।
- पञ्चीकरणम्।
- स्थूलप्रपञ्चोत्पत्तिः।
- पुत्रादीनाम् आत्मत्वखण्डनम्।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- अपवादः।
- तत्त्वमसिमहावाक्यार्थविचारः।
- जहदजहल्लक्षणयोः निरासः।
- भागलक्षणासमर्थनम्।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अहं ब्रह्मास्मीति महावाक्यर्थविचारः।
- श्रुत्यविरोधनिरूपणम्।
- श्रवणादिसाधननिरूपणम्।
- यमादिसाधनानि।
- जीवन्मुक्तलक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. नृसिंहसरस्वतीः, *वेदान्तसारः*, श्रीरामतीर्थविरचितया सुबोधिन्या, विद्वन्मनोरञ्जन्या च सहितः, वाराणसी : चौखम्बा कृष्णदास अकादमी।
2. सदानन्दरयोगीन्द्रः, *वेदान्तसारः* (हिन्दीव्याख्यासहितः), आचार्यः बदरीनाथशुक्लः (व्याख्याकारः), वाराणसी : मोतीलाल बनारसीदास।

सहायकाः ग्रन्थाः (Additional Readings)

1. रामशरणत्रिपाठी शास्त्रीः, वेदान्तसारः (‘भावबोधिनी’ संस्कृत-हिन्दीटीकोपेतः), बनारस : चौखम्बा विद्या भवन, चौक।
2. शास्त्री, मुसलगांवकरः, गजानन, वेदान्तसारः (‘सारबोधिनी’, ‘विमला’ संस्कृत-हिन्दीव्याख्योपेतः), वाराणसी : चौखम्बा कृष्णदास अकादमी।
3. रामशरणत्रिपाठी शास्त्रीः, वेदान्तसारः (‘भावबोधिनी’ संस्कृतव्याख्योपेतः), वाराणसी : चौखम्बा विद्या भवन।
4. लघुवासुदेवमननम् (ब्रह्मश्री सुब्रह्मण्यशास्त्रिणा संशोधितम्), श्रीवाणीविलासमुद्रायन्त्रालयः, श्रीरङ्गम्।
5. विवेकचूडामणिः (हिन्दी-अनुवादसहित), गोरखपुर : गीताप्रेस।
6. अपरोक्षानुभूतिः (हिन्दी-अनुवादसहित), गोरखपुर : गीताप्रेस।
7. निखिलानन्दः, स्वामी, वेदान्तसारः, (आङ्गलानुवादसहितः), अद्वैत आश्रमः, कलकात्ता।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.2: वासुदेवमननोक्ताः वेदान्तप्रमेयाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वासुदेवमननग्रन्थस्य परिचयप्राप्तिः।
2. सङ्ग्रहेण वेदान्ततत्त्वानां सारनिरूपणम्।
3. देहाद्व्यतिरिक्तस्य आत्मनः स्वरूपनिरूपणम्।
4. पञ्चकोशादीनां शरीरत्रयस्य च परिचयप्राप्तिः।
5. आत्मनः सच्चिदानन्दस्वरूपस्य अवबोधः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. वासुदेवमननग्रन्थस्य परिचयं प्राप्स्यन्ति।
2. सङ्क्षेपेण शरीरत्रयस्य, अवस्थात्रयस्य, पञ्चकोशानाञ्च परिचयम् अवाप्स्यन्ति।
3. वेदान्तदर्शनं प्रवेष्टुम् अपेक्षितसामर्थ्यं प्राप्नुवन्ति।
4. वेदान्तप्रमेयाणां समग्रज्ञानं प्राप्य अग्रिमस्तरार्थम् अर्हाः भविष्यन्ति।
5. संस्कृतभाषायाः दक्षतां व्याख्यानकौशलञ्च प्राप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.2	वासुदेवमननोक्ताः वेदान्तप्रमेयाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- अध्यारोपापवादप्रक्रिया।
- स्थूलसूक्ष्मप्रपञ्चसृष्टिः।
- साधनचतुष्टयम्।
- गुरूपसदनम्।
- प्रपञ्चस्य चेतनाचेतनविभागः।
- एकस्य आत्मनः अनेकत्वम्।
- प्रतिबिम्बपक्षे दृष्टान्ताः।

अन्वितिः २. **श्रेयोऽङ्कः १**

- दुःखादिचतुष्टयम्।
- मोक्षस्य नित्यत्वम्।
- विवेक्यविवेकिनोः विशेषः।

- शरीरस्य हेतोः विचारः।
- कर्मणः प्रकाराः।
- रागद्वेषादीनां कर्मप्रेरकत्वम्।
- प्रतिबन्धत्रयम्।
- रागद्वेषादिवृत्तिभेदाः।
- चित्तवृत्तिविचारस्य प्रयोजनम्।
- अज्ञानस्य स्वरूपलक्षणम्।
- ज्ञानस्य वस्तुतन्त्रत्वम्।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- आत्मनः शरीरत्रयवैलक्षण्यम्।
- आत्मनः ईश्वरत्वजीवत्वे।
- जीवस्वरूपम्।
- वृत्तित्रयम्।
- आत्मनः शरीरत्रय-पञ्चकोश-अवस्थात्रयव्यतिरिक्तत्वम्।
- आत्मनः अवस्थात्रयसाक्षित्वम्।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- पञ्चकोशाः।
- पञ्चकोशानाम् आत्मनश्च अन्योन्याध्याससम्बन्धः।
- आत्मनः सच्चिदानन्दरूपत्वम्।
- आत्मनः अखण्डार्थत्वम्।
- सन्यासिनां भेदाः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रृंगेरी-कवि -शर्मा नरसिंहः, वासुदेवमननम्, श्रृंगेरी : विद्याभारती प्रेस्, दक्षिणाम्नाय-शारदापीठम्।
2. सुब्रह्मण्यशास्त्री ब्रह्मश्रीः, लघुवासुदेवमननम् (संशोधितम्), श्रीरङ्गम्, श्रीवाणीविलासमुद्रायन्त्रालयः।
3. लघुवासुदेवमननम्, वाराणसी : श्रीदक्षिणामूर्ति मठप्रकाशनम्।

सहायकाः ग्रन्थाः (Additional Readings)

1. Tapasyananda, Swami. (1992). Laghuvasudeva Mananam. Ramakrishna Math. Chennai.
2. सरस्वतीः, नृसिंह, वेदान्तसारः, श्रीरामतीर्थविरचितया सुबोधिन्या, विद्वन्मनोरञ्जन्या च सहितः, वाराणसी : चौखम्बा कृष्णदास अकादमी।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.3: अद्वैतवेदान्तदर्शनेतिहासः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. अद्वैतवेदान्तस्य आचार्यपरम्परायाः भगवत्पादशिष्यपरम्परायाश्च बोधनम्।
2. अद्वैतवेदान्तसिद्धान्तप्रतिपादकानां मतभेदानां परिष्काराणां च ज्ञापनम्।
3. अद्वैतवेदान्तस्य प्रकरणग्रन्थानाम् आचार्यशङ्करप्रणीतस्तोत्राणां च परिचयः।
4. वेदान्तस्य प्रस्थानग्रन्थानां (श्रुतिप्रस्थानं, स्मृतिप्रस्थानं, सूत्रप्रस्थानं, भामतीप्रस्थानं, विवरणप्रस्थानम् इत्येतेषां) स्थूलपरिचयप्रदानम्।
5. वेदान्तेतरदर्शनानां प्रधानतत्त्वानां प्राथमिकम् अवबोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. अद्वैतवेदान्तस्य इतिहासं वर्णयितुं शक्ष्यन्ति।
2. वेदान्तेतरदर्शनानां परिचयं कारयितुं प्रभविष्यन्ति।
3. भविष्यत्काले अनुसन्धानपद्धतौ इमे विचाराः सहकुर्वन्ति इति दूरदृष्टिं प्राप्स्यन्ति।
4. दर्शनक्षेत्रे अद्वैतवेदान्तस्य महत्त्वम् अवगत्य वेदान्तग्रन्थानाम् अध्ययने अभिरुचिम् अवाप्स्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.3	अद्वैतवेदान्तदर्शनेतिहासः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- अद्वैतवेदान्तस्य आचार्यपरम्परा -
  - व्यासः।
  - गौडपादः।
  - श्रीशङ्कराचार्यचरितम्।
  - चत्वारः शिष्याः।

अन्वितिः २. **श्रेयोऽङ्कः १**

- शाङ्करभाष्यम्।
- श्रीशङ्कराचार्यैः रचितानि स्तोत्राणि।
- श्रीशङ्कराचार्यैः रचिताः प्रकरणग्रन्थाः।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- अद्वैतवेदान्तदर्शनस्य आचार्याः -
  - वाचस्पतिमिश्रः।
  - प्रकाशात्मयतिः।
  - श्रीहर्षः।
  - चित्सुखाचार्यः।
  - विद्यारण्यः।
  - मधुसूदनसरस्वती।
  - अप्पय्यदीक्षितः।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- न्याय-वैशेषिक-सांख्य-योग-मीमांसा-जैन-बौद्धदर्शनेषु प्रतिपादितानां जीवेश्वरबन्धमोक्षाणां समीक्षणम्।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. शर्मा, राममूर्ति, अद्वैत वेदान्त साहित्य का इतिहास तथा सिद्धांत।
2. सर्वदर्शनसङ्ग्रहः (अभ्यङ्करवासुदेवशास्त्रिविरचितव्याख्यासहितः), पुणे : प्राच्यविद्यासंशोधनमन्दिर।
3. उपाध्यायः आचार्यः बलदेव, भारतीय दर्शन, वाराणसी : शारदा मन्दिर।
4. उपाध्यायः आचार्यः बलदेव (प्रधानसम्पादकः), संस्कृत-वाङ्मय का बृहद् इतिहास, दशम खण्डः, लखनऊ : उत्तरप्रदेश संस्कृत संस्थान।

सहायकाः ग्रन्थाः (Additional Readings)

1. सिन्हा, प्रसाद हरेन्द्र प्रो., भारतीय दर्शन की रूपरेखा।
2. निगम, शोभा डॉ., भारतीय दर्शन।
3. शास्त्रीः, उदयवीर आचार्यः, वेदान्तदर्शन का इतिहास (वेदान्तविषयक बहिरङ्ग परीक्षात्मक मौलिक ग्रन्थ)
4. Vivekananda, Swami. Vedanta Philosophy. Kolkata: Advaita Ashrama.
5. जोयिस्, कृष्ण पण्डितप्रवरः, शाङ्करदर्शनमर्मप्रकाशः, तिरुपतिः : राष्ट्रिय संस्कृत विश्वविद्यालयः।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.4: पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः, पञ्चभूतविवेकः नाटकदीपश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. वेदान्तशास्त्रस्य प्रमेयविचाराणां परिचयप्राप्तिः।
2. आत्मनः अवस्थात्रयं, शरीरत्रयं, पञ्चकोशाः, आत्मनः निर्विकल्पत्वं, पञ्चीकरणम् इत्यादीनां विषये अवबोधनम्।
3. साक्षिणः स्वरूपम्, आत्मनः निर्विकारत्वादिविषयेषु स्पष्टप्रतिपत्तिः।
4. सरलतया आत्मतत्त्वस्य बोधनम्।
5. प्रकरणग्रन्थस्य शैल्याः परिचयप्राप्तिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. आत्मैव संवित्, संविदेव परमानन्दः इति अवगमिष्यन्ति।
2. अन्वयव्यतिरेकव्याप्तिभ्याम् आत्मनः नित्यत्वस्य ज्ञानं प्राप्स्यन्ति।
3. अध्यारोप-अपवादाभ्यां परमात्मनः अद्वैतत्वं ज्ञास्यन्ति।
4. योगस्य माहात्म्यं विज्ञाय तत्साधने अभिरुचिं प्राप्स्यन्ति।
5. आत्मनः सर्वजगदवभासकत्वं ज्ञातुं शक्ष्यन्ति।
6. अद्वैतरीत्या जगत्सृष्टिप्रक्रियाम् अवगमिष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.4	पञ्चदश्यां प्रतिपादितः तत्त्वविवेकः, पञ्चभूतविवेकः नाटकदीपश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- मङ्गलाचरणम्।
- जाग्रदाद्यवस्थात्रये संविदः अभेदः विषयेभ्यो भेदश्च।
- आत्मैव संवित्।
- संविदेव परमानन्दः।
- प्रकृतेः स्वरूपम्।
- अपञ्चीकृतपञ्चमहाभूतानाम् उत्पत्तिः।

- लिङ्गशरीरस्वरूपम्।
- पञ्चीकरणम्।
- देवतिर्यङ्नरविश्वानां संसारतो निवृत्तिः।
- अन्नादिपञ्चकोशानां निरूपणम्।
- अन्वयव्यतिरेकव्याप्तिभ्याम् आत्मनो ब्रह्मस्वरूपावाप्तिः।
- तत्त्वमसीति महावाक्यार्थनिरूपणम्।
- निर्विकल्पसमाधेर्लक्षणम्।

अन्वितिः २. **श्रेयोऽङ्कः १**

- परोक्षापरोक्षज्ञानयोः फलम्।
- तत्त्वविवेकप्रकरणस्य अभ्यासफलम्।
- अपञ्चीकृतपञ्चमहाभूतानां गुण-धर्म-कार्यवर्णनम्।
- जगदिदं भूतकार्यमिति ज्ञानोपायः।
- 'सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्' इति श्रुत्या सद्वस्तुप्रतिपादनम्।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- मायाशक्तेर्वर्णनम्।
- शक्तिः तत्प्रयोजनं च।
- सद्वस्तुविषये पञ्चमहाभूतविषये च विचारः।
- अद्वैतस्य अनादरः अद्वैतफलस्य प्रतिपादनं च।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- अध्यारोप-अपवाद-नृत्यशालास्थदीपदृष्टान्तनिरूपणम्।
- परमात्मनः निर्विकारत्वं सर्वप्रकाशकत्वञ्च।
- साक्षिणि बुद्धिधर्मारोपः।
- देशकालादिरहितं साक्षिस्वरूपम्।
- साक्षिस्वरूपानुभूतिविषयोपायः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. नारायणरामाचार्यः, पञ्चदशी, दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान।
2. पञ्चदशी, रामकृष्णटीकासहितः, वाराणसी : चौखम्बा संस्कृत सीरीस् आफीस्।
3. रायप्रोलु लिङ्गनसोमयाजी, वेदान्तपञ्चदशी (कल्याणपीयूषव्याख्यासमेता), तेनालि : लक्ष्मी पवर् मुद्राक्षरशाला।
4. महाराजः, गिरिजी महेशानन्द स्वामी, पञ्चदशी (हिन्दीव्याख्याकारः), वाराणसी : श्रीदक्षिणामूर्ति मठ प्रकाशन।

सहायकाः ग्रन्थाः (Additional Readings)

1. धोले, नन्दलाल, पञ्चदशी (आङ्गलानुवादकः), श्री सद्गुरु प्रकाशनम्।
2. स्वाहानन्दः, स्वामी, पञ्चदशी (आङ्गलानुवादकः), चेन्नैई : रामकृष्णमठ, मायलापुर, ।
3. विद्याभास्करः, पं. रामावतारः, पञ्चदशी (हिन्दीव्याख्याकारः), वाराणसी : चौखम्बा संस्कृत प्रतिष्ठान।
4. भारतीस्वामिन्, ज्ञानानन्द, पञ्चदशी (आङ्गलानुवादकः), श्रृङ्गेरी शारदापीठम्।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

प्रधानः पाठ्यक्रमः (Major) 1.5: श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. श्रीमद्भगवद्गीतायाः अध्यापनद्वारा वेदान्तशास्त्रस्य विषयाणां सुलभतया अवगमनम्।
2. भारतीयसंस्कृतेः बहूनां तत्त्वानां ज्ञापनम्।
3. गीतायाः महत्त्वस्य बोधनं तथा गीतायाः उपदेशस्य लक्ष्यस्य अवबोधः।
4. कर्म-ज्ञान-भक्ति-सन्न्यासादीनां ज्ञापनपूर्वकं तेषु अर्हतायाः स्पष्टतया ज्ञापनम्।
5. स्वस्थसमाजनिर्माणोपोगिनाम् अंशानां बोधनम्।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. भगवद्गीतायाः अध्ययनेन सुखेन वेदान्तविषयान् ज्ञातुं शक्ष्यन्ति।
2. श्लोकोद्धरणपूर्वकं गीतायाः सन्देशं प्रसारयितुं प्रभविष्यन्ति।
3. भाष्यमाश्रित्य गीतायाः श्लोकानाम् अर्थम् अवगमिष्यन्ति।
4. प्रौढग्रन्थानाम् अध्ययने सामर्थ्यं प्राप्स्यन्ति।
5. कर्मज्ञानादिषु परस्परं विरोधं परिहर्तुं प्रभविष्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.5	श्रीमद्भगवद्गीतायां प्रतिपादिताः साङ्ख्ययोग-कर्मयोग-ज्ञानकर्मसंन्यासयोगाः	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- भगवद्गीतायाः परिचयः।
- अर्जुनविषादः।
- स्वजनहनने दोषोद्भावनम्।
- युद्धाकरणे निश्चयः।
- साङ्ख्ययोगः।
- आत्मनः नित्यत्वम्।

अन्वितिः २. **श्रेयोऽङ्कः १**

- शरीरस्य जन्मादयः विक्रियाः।
- कर्मयोगस्य माहात्म्यम्।
- स्थितप्रज्ञनिरूपणम्।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- कर्मयोगः, निष्ठाद्वयं च।
- यज्ञादिकर्मणाम् अनुष्ठेयता।
- ज्ञानिनः कर्माभावः।
- लोकसङ्ग्रहः।
- कामादीनां जयः।
- ज्ञानकर्मसंन्यासयोगः।
- मायया परमात्मनः सम्भवः।
- नानाविधः यज्ञः।
- ज्ञानस्य महिमा।

अन्वितिः ४. **श्रेयोऽङ्कः १**

- कर्मसंन्यासयोगः।
- कर्मयोग-कर्मसंन्यासयोः सार्थक्यम्।
- ज्ञानिनः कर्मफलाभावः।
- आत्मसंयमयोगः।
- ध्यानयोगस्य माहात्म्यम्।
- साङ्गः योगः।
- योगभ्रष्टस्य गतिः।

निर्धारिताः ग्रन्थाः (Essential/Recommended Readings/Texts)

1. श्रीमद्भगवद्गीताशाङ्करभाष्यम्, गोरखपुर : गीताप्रेस्।
2. श्रीमद्भगवद्गीताभाष्यम् (अष्टटीकोपेतम्), मुम्बई : गुजराती मुद्रणालयाधिपतिनास्वीय मुद्रणागारे मुद्रयित्वा प्रकाशितम्।
3. श्रीमद्भगवद्गीता, शङ्करानन्दीटीका, चौखम्बा संस्कृत प्रतिष्ठान।

सहायकाः ग्रन्थाः (Additional Readings)

1. गम्भीरानन्दः, स्वामी, श्रीमद्भगवद्गीता (शाङ्करभाष्योपरि आङ्गलानुवादकः), रामकृष्णमठः।
2. स्वरूपानन्दः, स्वामी, श्रीमद्भगवद्गीता (शाङ्करभाष्योपरि आङ्गलानुवादकः), कलकत्ता : अद्वैत आश्रम।
3. गोयन्दका, जयदयाल, श्रीमद्भगवद्गीता, तत्त्वविवेचनी हिन्दी-टीका पदच्छेदान्वयसहित, गोरखपुर : गीताप्रेस।

काठिन्यस्तरः
100-199

श्रेयोऽङ्काः - 4
होराः - 60

द्वितीयसत्रार्द्धः (SEMESTER – 2)

प्रधानः पाठ्यक्रमः (Major) 1.6: पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः, द्वैतविवेकः, महावाक्यविवेक, कूटस्थदीपश्च

पाठ्यक्रमस्य उद्देश्यानि (Course Objectives)

1. सरलैः श्लोकैः वेदान्ततत्त्वानां परिचयप्राप्तिः।
2. अन्नमयादिपञ्चकोशानां स्वरूपावगमनम्।
3. ईश्वरनिर्मित-जीवनिर्मितप्रपञ्चयोः विवेचनम्।
4. जीवब्रह्मैक्यबोधकमहावाक्यानां सङ्ग्रहेणाध्ययनम्।
5. कूटस्थात्मनः स्वरूपप्रतिपत्तिः।

अधिगमस्य परिणामाः (Learning Outcomes): अस्य पाठ्यक्रमस्य अध्ययनादनन्तरं छात्राः :-

1. पञ्चकोशैः विविक्तम् आत्मस्वरूपं ज्ञास्यन्ति।
2. अन्वयव्यतिरेकाभ्याम् आत्मानात्मविवेकः कथं करणीयः इति कौशलं प्राप्स्यन्ति।
3. जीवस्य सुखदुःखयोः कारणं मानसप्रपञ्च एव इति ज्ञात्वा मनश्शुद्ध्यर्थं प्रवृत्ताः भविष्यन्ति।
4. महावाक्यैः प्रतिपादितस्य आत्मैक्यविज्ञानस्य निःसन्दिग्धं ज्ञानम् अवाप्स्यन्ति।
5. अविकारिकूटस्थचैतन्यस्य स्वरूपज्ञानेन आत्मनः असङ्गत्वं विज्ञास्यन्ति।

श्रेयोऽङ्कप्रारूपम् (Credit Framework)

पाठ्यक्रमकूटाङ्कः (Course Code)	पाठ्यक्रमशीर्षकम् (Course Title)	पाठ्यक्रमस्य श्रेयोऽङ्कविभाजनम् (Credit Distribution of the Course)			श्रेयोऽङ्काः (Credits)
		व्याख्यानम् (Lecture)	अनुशिक्षणम् (Tutorial)	प्रशिक्षणम्/अभ्यासः (Practical/Practice)	
प्रधानः पाठ्यक्रमः (Major) 1.6	पञ्चदश्यां प्रतिपादितः पञ्चकोशविवेकः द्वैतविवेकः महावाक्यविवेककूटस्थदीपश्च	04	0	0	04

पाठ्यक्रमविवरणम् (Details of Course)

अन्वितिः १. **श्रेयोऽङ्कः १**

- पञ्चकोशस्वरूपनिरूपणम्।
- अन्नमय-प्राणमय-मनोमय-विज्ञानमय-आनन्दमयकोशानां स्वरूपम्।
- तेषाम् अनात्मत्वनिरूपणम्।
- आत्मनः स्वप्रकाशत्वम्।
- आत्मनः सत्यज्ञानत्वविचारः।
- शून्यत्वस्य दुर्घटत्वम्।
- आत्मस्वरूपस्य वर्णनातीतत्वम्।

- सत्यत्वनिरूपणम्।
- आत्मनः बाधराहित्यम्।
- आत्मनः अनन्तत्वविचारः।
- जीवोपाधिप्रदर्शनम्।
- कोशपञ्चकविवेचनाफलम्।

अन्वितिः २. **श्रेयोऽङ्कः १**

- ईश्वरसृष्टं द्वैतं, तत्र श्रुतिप्रमाणञ्च।
- जीवसृष्टं द्वैतम्।
- मनसः जीवस्य बन्धकारणत्वम्।
- भाष्यकारवार्तिककारयोः सम्मतिप्रदर्शनम्।
- विज्ञानवादनिरासः।
- ईश्वरसृष्टेः ज्ञानसाधकत्वम्।
- शास्त्रीय-अशास्त्रीयद्वैतनिरूपणम्।
- मनोराज्यपरित्यागप्रशंसा।
- प्रकरणोपसंहारः।

अन्वितिः ३. **श्रेयोऽङ्कः १**

- चतुर्णां महावाक्यानां विवेचनम्।
- देहस्य कूटस्थचिदाभास-उभयभास्यत्वनिरूपणम्।
- दृष्टान्तमुखेन चिदाभासब्रह्मणोः भेदप्रदर्शनम्।
- ब्रह्मचिदाभासयोः विषयभेदेन भेदप्रदर्शनम्।
- कूटस्थचिदाभासयोः विवेचनाप्रकारः।
- चिदाभासव्यतिरिक्तकूटस्थे पूर्वाचार्याणाम् अभ्युपगमः।
- प्रस्थादिदृष्टान्तेन बुद्धौ आभासप्रतिपादनम्।

